॥ वैदिकवाङ्मये जीवः ॥

प्रथमोऽध्यायः
वैदिकवाङ्मये प्रमेयपदार्थाः
प्रमेयपदार्थानां विवरणम्
प्रमेयपदार्थेषु जीवः
द्वितीयोऽध्यायः
जीवस्वरूपम्
जीवो भेदः
जीवधर्मः (प्रवृत्तिनिवृत्यात्मकः)
जीवागतिः
जीवगतिः
जीवब्रह्मणोः भेदाभेदः
उपसंहारः
सहायकग्रन्थसूची

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

॥ वैदिकवाङ्मये जीवः ॥

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रो. पङ्कज एल. जानीजीमहाभागाः

लेखकः

डॉ. शत्रुघ्नपाणिग्राही

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - फरवरी, २०१३

ISBN -13 978-81-925721-9-2

प्रतयः - ३००

मूल्यम् - १००/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

वैदिकवाङ्मये जीवः

विषयानुक्रमणिका

विषयाः	पृष्ठसंख्या
शुभाशंसनम्	४
पुरोवाचः	५
प्रस्तावना	६
प्रथमोऽध्यायः	७ – २०
१. वैदिकवाङ्मये प्रमेयपदार्थाः	७
२. प्रमेयपदार्थानां विवरणम्	११
३. प्रमेयपदार्थेषु जीवः	१७
द्वितीयोऽध्यायः	२१ – ७२
१. जीवस्वरूपम्	२१
२. जीवो भेदः	२६
३. जीवधर्मः (प्रवृत्तिनिवृत्यात्मकः)	३०
४. जीवागतिः	५१
५. जीवगतिः	५७
६. जीवब्रह्मणोः भेदाभेदः	६४
७. जीवात्मनामनेकत्वम्	७१
८. जीवब्रह्मणोः अंशित्वम्---	७४
९. वैदिकवाङ्मयानुसारं जीवस्य मुक्तेः उपायाः	७६
उपसंहारः	८०
सहायकग्रन्थसूची	८४

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**-अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **विश्वसंस्कृतपुस्तकमेलायां** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। ममैवांशो जीवलोके जीवभूतः सनातनः इति श्रीमद्भगवद्गीतायाः वचनानुसारं जीवपुरुषः परमात्मनः अंशरूपः इति सिद्धं भवति। जीवः सर्वदा ब्रह्मणः अंशविशेषः। ब्रह्मणः सत्तां सम्प्राप्य सः असीमानन्दमनुभवति। कर्तुत्वभोक्तृत्वादि गुणयुक्तः अल्पज्ञोऽयं जीवः कथं सम्यक् रूपेण वेदप्रतिपादित-धर्मान् पालनं करिष्यतीति विषये पुस्तकेऽस्मिन् चर्चितमस्ति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. पङ्कज एल. जानी

कुलपतिः

।। पुरोवाच: ।।

वेदान्त-शास्त्रे यज्जीवब्रह्मणोरैक्यमुक्तम् तत् सर्वं-वैदिकवाङ्मये, विशेषरूपेण उपनिषत् साहित्ये तत्रापि गर्भोपनिषदि(यत्र जीवप्रवेशस्य मातृ-गर्भे विवरणं स्पष्टतया प्राप्यते) जीवस्य स्वरूपचिन्तनं मिलति। स च जीव: प्रमेयो भवन् साध्यो भवति दर्शनशास्त्रविचक्षणै:। ''जन्माद्यस्य यत:'' - इति वेदान्तसूत्रेण सर्वं रहस्यं जीवस्य संकेतयति। तस्मात् जीव: अस्ति परन्तु वैदिक-वाङ्मयालोके तस्य जीवस्य कीदृक्स्वरूपमस्ति ? तस्य कीदृशी-गतिर्भवति ? तस्य के-के धर्मा: ? कश्च सम्बन्ध: ब्रह्मणा सह ? तयोर्मध्ये मायाया: किं स्थानम् ? इत्येतेषां सर्वेषां विषयाणां यावच्छक्यं विश्लेषणं वैदिक साहित्यप्रमाणै: कृतमस्त्यत्र डॉ. शत्रुघ्न पाणिग्राही-महोदयेन-यद्दृष्ट्वा मनो मे मोदते। अत्र संक्षिप्तरूपेण वर्णितो विषय: सारल्येन जनानां विशेषरूपेण अध्ययने रतानां छात्राणां बुद्धौ प्रविष्टो भूत्वा स्थिरो भविष्यति-येन प्रपंचे गमन-श्रमात् पीडा तेषां न भविष्यति। अत: अस्य ग्रन्थस्य रचनाकृतेऽहं लेखकं शुभाशंसनवचोभि:, आशीर्वचोभिश्च संभूषयामि अस्यग्रन्थस्य च सफलतायै भगवन्तं सोमनाथं भजामि।

।। जयतु सोमनाथः ।।

प्रो. देवेन्द्रनाथपाण्डेयः
वेदविभागाध्यक्ष:

।। प्रस्तावना ।।

'भारतस्य प्रतिष्ठे संस्कृतं संस्कृतिस्तथा' इत्यभियुक्तवचनम् आधारीकृत्य कथयितुं शक्यते यत् भारतीयसंस्कृतिः अत्यन्तं महत्त्वपूर्णा । इयं संस्कृतिः वैदिकसंस्कृतिः कथ्यते । इयं संस्कृतिः प्राचीनतमा । वैदिकवाङ्मयः अस्याः संस्कृतेः परिप्रकाशमात्रम् । अयं वैदिकवाङ्मयः कर्मकाण्डप्रकाशनेन सहापि जीवपरमेश्वरयोः स्वरूपं, तत्त्वञ्च प्रकाशयति । ज्ञानकाण्डभागे जीवपरमेश्वरयोः सम्बन्धिनी चर्च्चा बहुलतया प्राप्यते । जीवः कः ? तस्य स्वरूपं किं ? तस्य साधनं च किम् ? इत्यादिषु विषयेषु चर्च्चा समुपलभ्यते वैदिकवाङ्मये । संहिताभागादारभ्य उपनिषद्भागपर्यन्तं ज्ञानकाण्डे जीवपरमेश्वरयोः चर्च्चा विहिता। इमं चर्च्चाभागम् आधारीकृत्य ''वैदिकवाङ्मये जीवः'' इति ग्रन्थरचनार्थम् अयं मम उद्यमः । उद्यमोऽयं स्वान्तःसुखाय विधीयते । अस्मिन् सारस्वत कर्मणि प्रेरणामूर्तयः श्रीसोमनाथसंस्कृतयुनिवर्सिटी 'इत्यस्य माननीयकुलपतिवर्येभ्यः श्री पङ्कज एल. जानीजी महाभागेभ्यः हार्दिककृतज्ञतां विज्ञापयामि, येषामपारकरुणया ग्रन्थस्यास्य प्रकाशनं जातम्। पुनश्च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षेभ्यः गुरुचरणेभ्यः श्रीमद् प्रो. देवेन्द्रनाथ पाण्डेयमहोदयेभ्यः तथा श्रीसोमनाथसंस्कृतयुनिवर्सिटी द्वारा संञ्चालितमहाविद्यालयस्य प्राचार्यवर्येभ्यः डॉ. नरेन्द्र एल. पाण्ड्या महोदयेभ्यः धन्यवादं विनिवेदयामि येषां मार्गदर्शनं मया प्रतिक्षणं प्राप्तम्। कर्मण्यस्मिन् येषां गुरुजनानाम् आशीर्वादः मया लब्धः तेभ्यः सर्वेभ्यः विपश्चिद्भ्यः कृतज्ञतापूर्वकं प्रणामाञ्जलिः विनिवेद्यते । पाठकाः सज्जनाश्च त्रुटिमार्जनपरायणाः सन्तः ग्रन्थमिमं स्वीकुर्य्युश्चेत् ममायम् उद्यमः सार्थकतां गच्छेत् ।

विनयावनतः

डॉ. शत्रुघ्नपाणिप्राही

प्रथमोऽध्यायः

१. वैदिकवाङ्मये प्रमेयपदार्थाः

वैदिकवाङ्मयं न तावत् इयत्तापूर्णमं तथापि विद्यास्थानं यदा विचार्यते तदा वेदादीनां ग्रहणात् तत् समीक्षणमाकल्यते । विद्या अष्टादश। ताः यथा ऋग्यजुसामाथर्ववेदाः, आयुर्वेद-धनुर्वेद-गान्धर्ववेद-स्थापत्योपवेदाः, शिक्षा-कल्पो-व्याकरण-निरुक्त-छन्दो-ज्योतिषानि अङ्गानि, पुराणं, न्यायशास्त्रं, मीमांसाशास्त्रं, धर्मशास्त्रञ्च । न्यायशास्त्रेण सह वैशेषिकशास्त्रस्य मेलनं कियदंशेन साम्यत्वात् भवति। पदार्थानां तत्त्वज्ञानात् निश्रेयसाधिगमरूपफलं यत् कल्प्यते तदनुरोधेन पदार्थाः विचारणीयाः । वाच्यत्वमभिधेयत्वं ज्ञेयत्वं वा पदार्थत्वमिति पदार्थलक्षणम् (सर्वदर्शनकौमुदी, पृ.६४) । तत्र वाच्यत्वं नाम वचनप्रकाशयोग्यत्वम् । अभिधेयत्वमभिधानयोग्यत्वम् । ज्ञेयत्वं ज्ञानयोग्यता। तत्र अभिधानयोग्यत्वं नाम ज्ञाप्यज्ञापकभावरूपः सम्बन्धः अर्थात् ये वचनप्रकाशयोग्या, अभिधानयोग्या ज्ञानयोग्या वा त एव पदार्थाः । पदार्थप्रतिपादकं शास्त्रं न्यायशास्त्रम् । तत् समानभावतया वैशेषिकशास्त्रमपि पदार्थशास्त्ररूपेण विचार्यते । पदार्थाः साधारणत द्विविधाः भवन्ति । ते यथा – भावपदार्थाः, अभावपदार्थाश्च । भावपदार्थाः न्यायदर्शनानुसारेण षोडशसंख्यकाः भवन्ति । वैशेषिकदर्शनानुसारेण ते षडेव । न्यायदर्शनोक्तेषु पदार्थेषु वैशेषिकदर्शनोक्त-पदार्थानामन्तर्भावः । न्यायदर्शनोक्तपदार्थाः यथा भगवता अक्षपादेन गौतमेन उपदिष्टाः – ''प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः'' (१/१/१) ।

वैशेषिकदर्शनानुसारं ते पदार्थाः यथा – द्रव्य-गुण-कर्म-सामान्य-विशेष्य-समवायः षट् भावपदार्थाः । अभावपदार्थस्य अपेक्षितेषु पदार्थेषु तावत् परिगणनं कथञ्चित् न सम्भवति । सांख्यदर्शने महर्षिकपिलेन पञ्चविंशतिपदार्थाः अङ्गीकृताः । तद्यथा – प्रकृतिः, पुरुषः, महत्तत्त्वम्,

अहङ्कारः, श्रोत्रं-त्वक्-चक्षु-जिह्वा-नासिका-वाक्-पाणि-पाद-पायु-उपस्थ-मनश्चेति एकादशेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धादि पञ्चतन्मात्राणि, क्षित्यप्तेजमरूद्-व्योमानि पञ्चमहाभूतानि च । महर्षिपतञ्जलिना योगदर्शने सांख्योल्लिखित-पञ्चविंशतितत्त्वैः सह ईश्वरं गृहीत्वा षड्विंशतिपदार्थाः स्वीकृताः । मीमांसादर्शने भाट्टसाम्प्रदायेन द्रव्यजातिगुणक्रियाऽभावभेदेन पञ्च पदार्था अङ्गीकृताः । प्रभाकरसम्प्रदाये तु द्रव्यगुणकर्मसामान्यपरतन्त्रताशक्तिसादृश्यसंख्या-भेदेनाष्टावेव पदार्थाः स्वीकृताः । चिदचिद्भेदेन पदार्थद्वयमङ्गीकृतवान् आचार्यशङ्करेण । विशिष्टाद्वैतवेदान्ते श्रीरामानुजाचार्यश्चिदचिदीश्वरभेदेन पदार्थत्रयं स्वीकृतवान् । माध्ववेदान्ते द्रव्य-गुण-कर्म-सामान्य-विशेष-विशिष्टांशि-शक्ति-सादृश्याभावभेदेन दशपदार्थाः परिकल्पिताः । श्रीनिम्बार्काचार्येण द्वैताद्वैतवेदान्ते श्रीरामानुजाचार्यस्य मतं स्वीकृतवान् ।

न्यायोक्तेन प्रमेयपदार्थेषु आत्मनः अन्तर्भावः । आत्मा द्विविधः । स च जीवात्मा परमात्मा चेति । उभयोः जीवात्मापरमात्मनोः स्वरूपं भिन्नम् । वेदान्तिनां मते चिदचिद्ब्रह्मरूपाणां पदार्थानां यदा विवेचनं भवति तदा चिद्ब्रह्मणोः सामान्येन स्वरूपसाम्यं परिलक्ष्यते । चित् पदार्थत्वेन जीवः स्वीक्रियते । तस्य जीवस्य प्रमाणं स्वरूपज्ञानं विना न सम्भवति । अतएव जीवः प्रमेयपदार्थः । जीवस्य स्वरूपं प्रतिपादयन् अद्वैतवादिनः जीवब्रह्मणो ऐक्यं, द्वैतवादिनः जीवब्रह्मणोः तदन्यथात्वं, भेदाभेदवादिनः भिन्नाभिन्नत्वमित्यादिप्रकारेण उपदिशन्ति । न्यायवैशेषिकमते अयं प्रमेयपदार्थः जीवः केवलं ज्ञानमात्रम् । "ज्ञानाधिकरणम् आत्मा" इति सूत्रनिबद्धत्वात् ।

ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत् ।।
— श्वेताश्वतरोपनिषदि १/९

जीवः ज्ञानवान् इति प्रतिपादयन्ति श्रुतयः "ज्ञाज्ञौ द्वावजा" इति यत् वक्ति तत्र समाधानमेतत् यत् जीवः अल्पज्ञाता एतस्मात् कारणात् प्रमेयपदार्थोऽयं जीवः सुखदुःखफलभोक्ता इति ऋग्वेदसंहितायामथर्ववेदीयमुण्डकोपनिषदि च श्रूयते । तद्यथा —

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।।

(ऋ.वे. १/१६४/२०)

जीवोऽयं अहंकारवशत: संसारेऽस्मिन् भ्रमतीति हेतो: तस्य ज्ञानसद्भावेऽपि अज्ञानता परिलक्ष्यते । एतस्मात् कारणात् यदा संसारफलोपभोगार्थं स अधिकारी तदा अनीशत्व सकाशात् अहंभावापन्न: सन् मुह्यमान: भवति । अहंभावपरित्याग: यदि तेन साध्यते तदा वीतशोक: सन् ईश्वर इव प्रमीयते । तस्य महत्ता तदानीमधिका जायते । तदुक्तं मुण्डकोपनिषदि –

समाने वृक्षे पुरुषो निमग्नोऽनिशया शोचति मुह्यमान: ।
जुष्टं यदा पश्यत्यन्यमी शमस्य महिमानमिति वीतशोक: ।।

मुण्डको.उप. ३/१/२

जीवब्रह्मणो: उभयो: साम्येऽपि फलभोगदृष्ट्या भिन्नत्वं उभयो: निराकारत्वेऽपि कूटस्थनित्यत्वेन जीवस्य परिप्रकाश: भवति प्राणिशरीरेषु । पूर्वकृतकर्मानुसारं तस्य विविधयोनिषु संसरणं कर्मफलोपभोगाय । एतदर्थं नचिकेतसे उपदिशता भगवता यमराजेन कथ्यते – कृष्णयजुर्वेदीयकठोपनिषदि यत् –

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिन: ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ।।

कठ.उप. २/२/७

प्रमेयपदार्थस्य जीवस्य ईदृशी संसृति: ऋग्वेदीयनासदीयसूक्ते विस्तरेण सह श्रूयते । सामान्यत: विचारकृते एवं प्रतिपादयितुं शक्यते सत: बृहद्गुणसम्पन्नात् भूमेत्याख्योपनिबद्धात् ब्रह्मण: सद् रूपक: जीव: सम्भवति यस्मात् कारणात् भावपदार्थत्वेन प्रमयेपदार्थत्वेन च तस्य परिगणनं ऋषिभि: कृतमिति ज्ञातम् । प्रेत्यभावदशायामपि जीवस्य अस्तित्वकारणात् भावपदार्थत्वं प्रमेयपदार्थत्वं च आपद्येत यद्यपि सोधाकार: तदर्थमुपयुज्यते । परिप्रकाशदशायां साधारणमनुष्यरूपेण इत्थं च अतिथिरूपेण तस्य स्वीकृतित्वात् देहधारिण: जीवात्मन: प्रमेयत्वं सुस्थितम् । स्मृतिशास्त्रदृष्ट्या जीवस्य सात्त्विकी-

राजसिकी–तामसिकीभेदैः परिप्रकाशः तदनुसारेण कर्मफलोपभोगः विचार्यते। जीवः प्रमेय न भवेत् चेत् एषः विचारः नोपपद्यते । अतः कर्म सम्पादनकारणात् कर्मफलोपभोगकारणात् ईश्वर इव महिम्नत्वात् जीवः प्रमेयः शास्त्रकारैः समुद्घोषितः । जीवस्य महिमानम् उद्घोषयन्ति श्रुतिः कथयति– ''सचानन्त्यायकल्प्यते'' इति । जीवः स्वयं ज्योतिः ईश्वर इव प्रवर्त्तते । किन्तु तस्य स्वयं ज्योतिष्ट्वं केवलं सुषुप्तिदशायां सम्भवति । तदुक्तं शुक्लयजुर्वेदीयबृहदारण्यकोपनिषदि (४/३/१४)–''अत्रायं पुरुषः स्वयं ज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत उर्ध्वं विमोक्षाय ब्रूहीति'' इति जीवस्य पुरुषरूपेण प्रमेयत्वमनेन रूपेण सिद्धम् । जीवस्य प्रमेयत्वं उद्घोषयन् पुरुषोत्तमः श्रीकृष्णः भगवद्गीतायामुपदिशति । तद्यथा–

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।। (१५/१६)

अत्र प्रमेयरूपेण उपस्थापितः अयं जीवः कूट एव अवस्थितः एवं च अक्षरपुरुषः । क्षरपुरुषस्य प्रमेयत्वं तु हस्तपादादिना प्रतिपादयितुं शक्यते किन्तु जीवपुरुषस्य प्रमेयत्वं तु तस्य कार्येभ्यः निश्चीयते । तस्य कार्याणि उपदिशति न्यायसूत्रकारः भगवान् गौतमः यथा –

''इच्छाद्वेषप्रयत्न सुखदुःख ज्ञानान्यात्मनो लिङ्गमिति''।
(न्या.सू. १/१/१०)

वैशेषिकदर्शने अपि इत्थं विशेषतः पर्य्यालोचितम् । अनन्तरं ब्रह्मसूत्रे भगवता बादरायणेनापि जीवस्य प्रमेयत्वं द्वितीयाध्याये तृतीयपादे परिशीलितम् । महाभारते मोक्षधर्मे मोक्षाधिकारप्रसङ्गे जीवस्य प्रमेयत्वं निर्णीतम् । भगवद्गीतायां ''जीवभूतां महावाहो ययेदं धार्यते जगदिति'' (७/५) वचनात् एवं च ममैवांशो जीवलोके जीवभूतः सनातनः (गीता १५/७) इति उपदिष्टत्वाच्च जीवस्य प्रमेयत्वं उररीकृतम् । भक्तिशास्त्रे विशेषतः श्रीमद्भागवते भक्तिनिमित्तमधिकारीनिर्णयप्रसङ्गे जीवस्य प्रमेयत्वं विचार्यते । प्रमेयत्वं विना न कश्चिद् अधिकरोति किञ्चित् । तस्य जीवस्य बहुधा स्वरूपप्रकटनं यद्यपि परिलक्ष्यते तथापि तस्य नित्यत्वात्, स्वयं ज्योतिष्टत्वात् 'ज्ञ'त्वात्

फलोपभोगसामर्थ्यत्वात्, ब्रह्मण: अंशत्वात्, प्रमेयत्वं निश्चितमेव । न्यायोक्तपदार्थानां वैशेषिकोक्तपदार्थानां वा तत्त्वज्ञानात् मोक्षोपलब्धि: तत्र उपलब्धिकारस्य जीवस्य अवश्यं सम्पृक्तित्वात् तदवच्छिन्नत्वेन जीवस्य प्रमेयत्वं सञ्जायते । यद्यपि परमात्मनो ब्रह्मण: प्रमेयत्वं विचार्यते तथापि प्रमेयपदार्थत्वेन जीवो हि स्वीक्रियतेतराम् इति ॥

२. प्रमेयपदार्थानां विवरणम्

न्यायसूत्रकारेण महर्षिणा गौतमेन प्रथमसूत्रे प्रमाणादारभ्य निग्रहस्थानान्ता: षोडशपदार्था: उद्दिष्टा: तद्यथा – ''प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वज्ञानात् नि:श्रेयसाधिगम:'' (न्या.सू. १/१/१) । तत्र द्वितीयपदार्थत्वेन प्रमेयस्य सम्मुल्लेख: वर्तते । अत्र प्रमेयत्वं पारिभाषिकम् । परिभाषाश्चात्र महर्षिगौतमस्य सङ्केत: । स द्विधा । तन्निमित्तश्च –''मुमुक्षून् प्रति यन्मिथ्याज्ञायमानं साक्षादनुकूलप्रतिकूलयो: रागद्वेषहेतु: तत् प्रमेयमित्येकम् । सम्यग् ज्ञायमानं यत् साक्षात् संसारबीजं निकृन्तति तद् द्वितीयम्'' इति (लक्षणमाला पृ.२०) । प्रमेयं द्वादशविधम् – ''आत्मशरीरेन्द्रियार्थबुद्धिमन: प्रवृत्तिदोषप्रेत्यभावफलदु:खापवर्गभेदेन'' (न्या.सू. १/१/९) । साक्षात् मोक्षजनकज्ञानविषयतया प्रमेयत्वं सुस्पष्टम् । ''द्वादशप्रमेयेषु आत्मन: मनो यावत् षड्विधं प्रमेयं कारणरूपमवशिष्टं च कार्यरूपम् । अत्रापि आत्मापवर्गयो उपादेयत्वं तत् इतरायणं च हेयत्वम्'' (बुद्धिविमर्श: पृ.२) इति । अत्र आत्मपदेन जीवात्मा ग्राह्य इति भाष्यकारस्य आशय: । आत्मन: सर्वद्रष्टृत्वं, सर्वभोक्तृत्वं, सर्वज्ञत्वं सर्वानुभावित्वञ्च तेन स्वीकृतम् । जीवात्मन: सर्वज्ञत्वं नाम सर्वेन्द्रियग्राह्य सर्वविषयत्वम् ।

आत्मा – न्यायनये जीवात्मा–परमात्माभेदेन आत्मन: द्वैविध्यम् । उभयो: साधारणलक्षणं च ज्ञानाधिकरणत्वम् । तत्र परमात्मन: ज्ञानं नित्यम् । अत: नित्यज्ञानाधिकरणत्वं परमात्मत्वम् इति युक्तम् । जीवात्मन: ज्ञानं तु अनित्यम् । अत: अनित्यज्ञानाधिकरणत्वं जीवात्मा इति । जीवात्मन: शरीरावच्छेदे ज्ञानं, शरीरमन्तरेण तज्ज्ञानोत्पत्ति असम्भवात् । जीवात्मा बहु

विभुनित्यश्च । परमात्मा एक: नित्य: विभुश्च । आत्मा मानसप्रत्यक्षविषयत्वम् इति नैयायिका:, अनुमानगम्यत्वमिति वैशेषिका: । जीवात्मन: नित्यत्वस्वीकारे एव तत् पुनर्जन्मसम्भवात् । जीवात्मनि चतुर्दशगुणा: – बुद्धि:, सुखम्, दु:खम्, इच्छा, द्वेष:, प्रयत्न:, संख्या, परिमाणम्, पृथक्त्वम्, संयोग:, विभाग:, भावनाख्यसंस्कार:, धर्म:, अधर्मभेदात् । एतेषु नवविशेषगुणा: पञ्च च सामान्यगुणा: भवन्ति । परमात्मनि ईश्वरे अष्टौ गुणा: तत्र बुद्धि–इच्छा–यत्नश्च इति त्रयं विशेषगुणपदवाच्यम् ।

शरीरम् – चेष्टाश्रयत्वम्, इन्द्रियाश्रयत्वम्, अर्थाश्रयत्वं वा इति शरीरस्य लक्षणम् । तदर्थं चेष्टेन्द्रियार्थाश्रय: शरीरमिति सूत्रमाह महर्षि गौतम: (न्या.सू. १/१/११) । चेष्टा नाम हितप्राप्ति–अहितपरिहारयो इच्छावशत: यत्नवत: जीवस्य तदनुष्ठानलक्षणा समीहा इति । सा यत्र वर्त्तते तत् शरीरम् । अत: घटादिपदार्थेषु एतादृशचेष्टाया अभाव: । इयं जीवशरीरस्य धर्मरूपा । शरीरविशेषे अस्या: अभावेऽपि एतद् योग्यताया: सत्वात् न कापि हानि: ।

इन्द्रियाश्रयत्वमिति द्वितीयलक्षणम् । कथमिन्द्रियाश्रय: शरीरमिति उच्यते अत्र न्यायभाष्यकारेण यत् – ''यस्य अनुग्रहेण अनुगृहीतानि उपघाते च उपहतानि स्व विषयेषु साध्वसाधुसु प्रवर्त्तन्ते स एषाम् आश्रय: शरीरम्'' इति ।

अर्थाश्रयत्वं शरीरस्य तृतीयलक्षणम् । अत्र अर्थशब्दस्य लाक्षणिकप्रयोग: । यस्मिन् आयतने इन्द्रियार्थसन्निकर्षात् उत्पन्नयो सुखदु:खयो: प्रतिसम्वेदनं प्रवर्त्तते स एषामाश्रय: शरीरमिति । शरीरं विना आत्मनि न सुखदु:खोत्पत्ति: । शरीरावच्छेदे एव आत्मनि सुखदु:खयो: मानसप्रत्यक्षरूप–अनुभव: जायते । तेन च अवच्छेदकता सम्बन्धेन सुखदु:खरूपार्थस्य आश्रयत्वं शरीरस्य लक्षणमिति स्पष्टम् ।

इन्द्रियम् – इन्द्रियलक्षणं तद्भेदाश्च ईशानुचिन्तने उक्ता: । यदुक्तम् –

शब्दभिन्ना: समुद्भूता ये विशेषगुणा मता: ।
तेषामनाश्रय: सन् यो ज्ञानबीजस्य वस्तुत: ।।

मनोयोगस्य चाधार इन्द्रियं तद्विलक्ष्यते ।
इन्द्रियं षड्विधं न्याये नैकादशविधं मतम् ॥
अतिप्रसक्तताहेतोः कर्मेन्द्रियाणि पञ्च च ।
स्वातन्त्र्येण प्रमाणज्ञैर्नाङ्गीकृतानि तत्त्वतः ॥

(ईशानुचिन्तनम् – इन्द्रियविवेकः)

षड्विधेषु इन्द्रियेषु घ्राणरसनचक्षुस्त्वक्श्रोत्राणि भूतजानिमनस्तु अभौतिकम् । प्रत्येकमिन्द्रियस्य अधिष्ठानं ईशानुचिन्तने स्पष्टम् । यदुक्तम् ईन्द्रियविवेके –

कृष्णसारे च जिह्वायां नासिकायां यथाक्रमम् ।
चक्षुश्च रसनं घ्राणमधिष्ठितानि वस्तुतः ॥
त्वक् च सर्वशरीरे हि कर्णच्छिद्रेष्वधिष्ठिते ।
श्रोत्रमिति मतं न्यायविद्यारण्यविहारिणः ॥
कर्णशष्कुल्यवच्छिन्न आकाशः श्रवणेन्द्रियम् ।
विभ्वाकाशात् कथं नित्यादुत्पन्नश्च तदिन्द्रियम् ॥
पञ्चम्यर्थः प्रयोज्यत्वं 'भूतेभ्य' इति शब्दतः ।
तेन च स्व प्रयोज्यं हि नाकाशजं तदिन्द्रियम् ॥
उपलब्धौ सुखादीनां साधनं मन उच्यते ।
ज्ञानानां युगपज्जन्माभावस्तल्लिङ्गमीरितम् ॥ इति ॥

(ईशानुचिन्तनम् – इन्द्रियविवेकः)

अर्थः – चतुर्थप्रमेयम् अर्थ नाम्ना प्रसिद्धम् । वैशेषिकदर्शने महर्षिणा कणादेन अर्थपदेन द्रव्यगुणकर्मणां संग्रहः कृतः । महर्षिणा गौतमेन अर्थपदेन ''रूपरसगन्धस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः''(न्या.सू.१/४/१४) इति सूत्रेण इन्द्रियार्थाः गन्धरसरूपस्पर्शशब्दाः इति पञ्चगुणाः अङ्गीकृताः । तर्कभाषाकारेण अर्थपदेन द्रव्यादयो अपि स्वीकृताः ।

बुद्धिः – बुद्धिः जीवात्मनः विशेषगुणः । बुद्धिस्तु महर्षिणा गौतमेन "बुद्धिरुपलब्धिज्ञानमित्यऽनर्थान्तरम्" (न्या.सू. १/१/१५) इति सूत्रेण विवक्षिता । सांख्यशास्त्रे बुद्धि उपलब्धिज्ञानमिति परस्परं भिन्नपदार्थः । किन्तु न्यायनये ज्ञानादयः बुद्धेः पर्यायाः । जीवात्मनि बुद्धिः समवायसम्बन्धेन उत्पद्यते । परमात्मनि बुद्धिः नित्या । बुद्धिः द्विविधाः –स्मृति–अनुभवभेदेन । तत्र अनुभवः चतुर्विधः प्रत्यक्षानुमितिउपमितिशाब्दभेदेन । प्रकारान्तरेण बुद्धिः द्विविधा प्रत्यक्षा परोक्षा च । या ज्ञानाकरणिका सा प्रत्यक्षा । या च ज्ञानकरणिका सा परोक्षा । यथा – अनुमितिः, उपमितिः, शाब्दबोधः, स्मृतिश्च । प्रकारान्तरेण बुद्धिः प्रमाऽप्रमाभेदेन द्विविधा ।

मनः – सुखाद्युपलब्धिसाधनम् इन्द्रियं मनः । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् । इदं मनः अन्तरिन्द्रियमिति । मनसा मानसप्रत्यक्षं जायते । मानसप्रत्यक्षं अनुव्यवसायनाम्ना व्यपदिश्यते । प्रत्यक्षप्रक्रियां आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियं पदार्थेन । मनो नित्यम्, अणुः । मनोजयेन सर्वेन्द्रियाणां जयः । ज्ञानसामान्यं प्रति मनसः कारणं वर्त्तते एव । मनः मूर्त्तद्रव्यम् । मूर्त्तत्वं नाम क्रियावत्त्वम् । मनसः न विभूत्वं तस्य विभूत्वे युगपत् नाना प्रत्यक्षं स्यात् । मनः अनेकं, निरवयवं च । जन्यप्रत्यक्षमात्रं प्रति इन्द्रियं करणं भवति । इन्द्रियसन्निकर्षं विना प्रत्यक्षं नैव सम्भवति । अतः चाक्षुषादिप्रत्यक्षं प्रति यथा चक्षुरादिन्द्रियं करणं तथैव सुखदुःखादिविषयकप्रत्यक्षं प्रति एकमिन्द्रियं करणरूपेण अङ्गीकार्यं तच्च मनः इति ।

प्रवृत्तिः – प्रवृत्तिः वाक्बुद्धिशरीरारम्भः । धर्माधर्मजनकशुभाशुभकर्म एव प्रवृत्तिनामकप्रमेयम् । तदेव कर्मबोधकेन आरम्भशब्देन न्यायभाष्यकारेण उक्तम् । प्रवृत्तिः द्विविधा कारणरूपा कार्यरूपा च । यत्नत्वजातिविशिष्टः प्रसिद्धः यः प्रयत्नः स एव कारणरूपः । अदृष्टं च कार्यरूपा प्रवृत्तिः । प्रवृत्तिः मनोजन्या शरीरजन्या च । शरीरेण परित्राणं, परिचर्या, दानं च, वाक्येन सत्यं, हितं, प्रियं, स्वाध्यायश्च इति बोध्यम् । मनसा च दया, अस्पृहा श्रद्धा च सम्मिल्य इति दशविधाः पूण्यप्रवृत्तिः । अस्याः वैपरीत्येन पापप्रवृत्तिरपि दशविधाः ।

दोषाः – प्रवर्त्तनालक्षणा दोषाः । प्रवर्त्तना नाम प्रवृत्तिजनकत्वम् ।

रागद्वेषमोहा: दोषा: । रागो नाम इच्छा । द्वेषो नाम मन्यु: । मोह नाम मिथ्याज्ञानम् । एते रागद्वेषमोहा: आत्मानं पापे पुण्ये वा प्रवर्त्तयन्ति । यस्मिन् आत्मनि मिथ्याज्ञानं जायते तस्मिन् रागद्वेष इति । अत: प्रवृत्तिजनकत्वं दोषत्रयस्य लक्षणम् । कर्म प्रवृत्त्या रागादय: अनुमानप्रमाणसिद्ध: । एते दोषा: मनोग्राह्या यद्यपि एते सर्वे दोषा: स्वात्मनि प्रत्यक्षसिद्धा: तथापि अन्यात्मनि अनुमेया: । स्वात्मनि प्रत्यक्षसिद्धपि इमे दोषा: कर्मप्रवृत्तिजनका: । उक्तं च भगवता श्रीकृष्णेन गीतायां –

"त्रिविधं नरकस्येदं द्वारं नाशनमात्मन: ।
काम: क्रोधस्तथालोभ: तस्मात् एतत् त्रयं त्यजेत् ।।"

(भगवद्गीता १७/२१)

मिथ्याज्ञानं विना रागद्वेषो न स्याताम् । मिथ्याज्ञानस्य रागद्वेषोत्पत्तिः हेतुत्वात् इति।

प्रेत्यभाव: – "पुनरुत्पत्ति: प्रेत्यभाव:" (न्या.सू. १/१/१९) । मरणानन्तरं पुन: जन्म एव प्रत्यभाव इति । भाष्यकारेण उक्तम् – "मृत्वा पुनर्जन्मप्रेत्यभाव" इति । अत्र पुनरुत्पत्तिर्नाम देहादिभि: सम्बन्ध: । पुन: शब्देन जन्मन: पौन:पुन्येन कथनम् । मरणानन्तरं पुन: पुन: जन्मरूपप्रेत्यभाव: अनादि: अपवर्गान्तश्च ।

तर्कभाषाकारेण पुनरुत्पत्ति: प्रेत्यभाव: इत्युक्त्वा स च आत्मन: पूर्वदेहनिवृत्ति: अपूर्वदेहसंघातलाभ: इत्युक्तम् ।

ननु आत्मन: नित्यत्वात् नित्यस्य च उत्पत्ते: अभावात् कथं पुनर्जन्म इति चेत् देहादिभि: सम्बन्ध: न तु नूतनतया आत्मोत्पत्ति: तस्य नित्यत्वाङ्गीकारात् । मरणं नाम शरीरप्राणान्तिमसंयोगध्वंस: । जन्म नाम शरीरप्राणाद्यसंयोग: ।

फलम् – "प्रवृत्तिदोषजनितो अर्थ: फलम्" (न्या.सू. १/१/२०) फलं नाम सुखदु:खसम्वेदनम् । द्विविधं फलं भवति मुख्यगौणभेदेन । सुखदु:खोपभोग: मुख्यफलरूपम् । देहेन्द्रियप्रभृतिनि तत् साधनानि गौणफलानि । धर्माधर्मौ फलमात्रस्य जनकौ । अत: फलमात्रं प्रवृत्तिदोषजनितम्

। दोष: केवलं प्रवृत्तिं प्रति न कारणम् । किन्तु प्रवृत्तिजन्यं सुखं दु:खं च प्रत्यपि । तर्कभाषाकारेण उक्तं फलं पुनर्भोग: सुखदु:खान्यतर साक्षात्कार: ।

दु:खम् – "वाधनालक्षणा दु:खमिति" (न्या.सू.१/१/२१)। वाधना नाम पीडा । जीवस्य जन्ममात्रं दु:खम् । दु:खसम्बन्धशून्यं किमपि जन्मनास्ति । सर्वं दु:खेन अनुविध्यं इति पश्यन् दु:खं जिहासु जन्मनि दु:खदर्शी निर्विद्यते । उपस्थितेऽपि भोग्यविषये तत्र वितृष्णा एव वैराग्यम् । वैराग्यं विना मुक्ति: न सम्भवति । दु:खानि एकविंशति संख्यकानि । तत्र षड्विधानि इन्द्रियाणि, तै: ग्राह्या: षड्विधा: विषया: तेषु च विषयेषु षड्विधा: प्रत्यक्षरूपबुद्धय:, शरीरं, सुखं, दु:खं च ।

अपवर्ग: – "तदत्यन्तविमोक्ष्योऽपवर्ग:" (न्या.सू. १/१/२२) । आत्यन्तिकी दु:खनिवृत्ति: अपवर्ग: । अयं अपवर्ग: एकोविंशतिप्रभेदभिन्नस्य दु:खस्य आत्यन्तिकी निवृत्ति: । अपवर्गप्राप्ति: कथं भवति इत्यत्र उत्तरयति तर्कभाषाकार: – "शास्त्राद् विदितसमस्तपदार्थतत्त्वस्य विषयदोषदर्शनविरक्तस्य मुमुक्षोर्ध्यायिनो ध्यानपरिपाकवशात् साक्षात्कृतात्मन: क्लेशहीनस्य निष्कामकर्मानुष्ठानादनागतधर्माऽधर्मावनर्जयत: पूर्वोपात्तञ्च धर्माऽधर्मप्रचयं योगर्द्धिप्रभावाद् विदित्वा, समाहृत्य भुञ्जानस्य पूर्वकर्मनिवृत्तौ वर्तमानशरीरापगमे पूर्वशरीराभावाच्छरीराद्येकविंशतिदु:खसम्बन्धो न भवति कारणाभावात् । सोऽयमेकविंशतिप्रभेदभिन्नदु:खहानिर्मोक्ष: (तर्कभाषा) । सोऽपवर्ग इत्युच्यते ।

३. प्रमेयपदार्थेषु जीव:

प्रमातुं योग्यं प्रमेयम् । निश्रेयसाधिगमार्थमावश्यकभूतेषु पदार्थेषु प्रमेय: अन्यतम: । उपदिष्टा: ते षोडशपदार्था: भगवता अक्षपादेन गोतमेन न्यायदर्शने (१/१/१) । प्रमेयपदार्था: द्वादश भवन्ति । एतेषु आत्मा अन्यतम: । स एव आत्मा जीवपरमभेदेन द्विविध: । उभयो: लक्षणं यद्यपि सामान्यत: एकं तथापि परमस्य लक्षणं प्राधान्येन भिन्नं भवति । जीवस्य तु वैषम्यपूर्णम् । तत्र तस्य वैषम्ये कारणं भवति तस्य प्रादुर्भाव: । यद्यपि न जायते म्रियते वा कश्चित् इति उभयो: समानं स्वरूपलक्षणं तथापि तटस्यलक्षणेन उभयो: भिन्नता । अवाङ्

मनसगोचरत्वात् परमं केवलं लक्षमात्रम् । जीवस्तु सन्धानकारणम् । सन्धानकारणत्वात् प्रमेयस्य जीवस्य प्रासङ्गिकता वरीवर्त्तते । दृश्यमानेऽस्मिन् जगति जीवरूपं दृश्यते । तस्य दृश्यमानत्वं पुनर्भवत्वं सूचयति । यदुक्तं श्रीमद्भागवते (१/३/३२) – "स जीवो यत् पुनर्भवः" इति । सरस्वतीरहस्योपनिषदि जगत् ब्रह्मणोः यत् स्वरूपं प्रकाश्यते तत्र ब्रह्मस्वरूपे जीवस्वरूपमन्तर्भुतम् । सरस्वतीरहस्योपनिषद्वचनं यथा –

अस्ति भाति प्रियं रूपं नाम चेत्यंश पञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ।। इति ।

(स.उप. ३२ मन्त्रः)

एतस्मिन् स्वरूपलक्षणे जीवस्य अस्तित्वं भातित्वम् इति द्वयं स्वीक्रियते । क्रियात्वं परमे ब्रह्मणे एवारोप्यते । जीवस्य अस्तित्वप्रसङ्गे 'अहं ब्रह्मास्मि', 'सर्वं खल्विदं ब्रह्म' इत्यादि श्रुतिवाक्यमेव प्रमाणम् । भातित्वप्रसङ्गे तस्य भाषा सर्वमिदं विभाति इति मुण्डकश्रुतिवाक्यं जीवस्य प्रमाणरूपेण आदरणीयम् । अस्तित्वे भातित्वे जीवस्य एकस्मात् कारणात् प्रमेयत्वं स्वीक्रियते । प्रमेयपदार्थे तस्य कार्यं जागतिकसम्पृक्तिजनितम् । अवस्तु इव अन्यैः प्रतिपादितोऽयं जीवः वस्तुगत्या आवश्यकरूपेण प्रामुख्येन स्वीक्रियते, अन्यथा कार्याभावः । एतस्मात् कारणात् श्रीमद्भागवते प्रथमस्कन्धे प्रथमाध्याये द्वितीयश्लोके भगवता व्यासदेवेन उपदिष्टं यथा – "वेद्यं वास्तवमत्र वस्तुशिवदं" इति । मङ्गलवादनकारणात् एतस्य जीवरूपस्य प्रमेयपदार्थस्य लिङ्गमर्थात् कार्यं विचारणीयम् । जीवस्य लिङ्गं तु सुखदुःखेच्छाप्रयत्नप्रभृतिः । प्रमेयपदार्थरूपेण जीवः परिगणितः न भवेत् चेत् असारेऽस्मिन् संसारे प्रवृत्तेः अनुशीलनं न स्यात् । जीवस्य आविर्भावतिरोभावरूपमवस्थाद्वयं वीक्ष्य जीवस्य प्रमेयरूपेण प्रासङ्गिकता आकल्यते । जन्मानुसारं शरीरधारणप्रभृतिकार्यसम्पर्कात् जीवः उपाधिरूपोऽपि उपासनीयः । जीवः केनभावेन जागतिकव्यापारान्तर्भूतः भवति, कथं तस्य देहान्तरप्राप्तित्वं, कथं तस्य लिङ्गशरीररूपेणावस्थानम्, एतत् सर्वं प्रमेयस्य जीवस्य सारवत्तां प्रकाशयति । अध्यात्मरामायणे बुध्यवच्छिन्नचैतन्यप्रभृतिस्वरूपावच्छिन्नजीवः विश्लिष्यते । तथा

योगवाशिष्ठेऽपि विचार्यते । विस्तरभयात् तदत्र नोट्यंक्यते । जीवः भोक्तृ पुरुषरूपेण समादृतत्वात् तस्य भोक्तृत्वं कथं, कदा च तस्य भोक्तृत्वमित्यादि विचार्यते । यद्यपि तस्य भोक्तृत्वे कर्त्तृत्वे स्वातन्त्र्यं सन्दिह्यते तथापि तत्र प्रमेयपदार्थरूपेण विचारे कृते सति सर्वं सुस्थिरं स्यात् । अतएव न्यायवैशेषिक-विचारदृष्ट्या भवतु, वेदान्तदृष्ट्या वा भवतु जीवः समुपस्थापनीयः । अध्यात्मविद्यायां वेदान्तशास्त्रस्य नित्यानां चेतनश्चेतनानां इति कृष्णयजुर्वेदीय कठश्रुतिवाक्यं निरर्थकं स्यात् ।

जीवः नित्योऽपि अज्ञ भवति । तस्मात् 'ज्ञाज्ञौ द्वावजा' इति वाक्यं श्रूयते । अत्र अज्ञता नाम अल्पज्ञानं षडर्थबोधक 'ज्ञ'पदसामर्थ्यात् । अतएव परमः सर्वज्ञः जीवस्तु अल्पज्ञः एव । ब्रह्मसूत्रकारेण भगवता (२/३/१८)''ज्ञोऽत एव'' इत्यपि सूत्रं सूत्रितम् । सर्वेषु वेदान्तेषु जीवस्य ज्ञानिरूपत्वं प्रतिपादितम्। न्यायवैशेषिकदर्शने जीवस्य ज्ञानाश्रयत्वं प्रतिपादितम् । तदपि जीवव्यापारदृष्ट्या संगच्छते । जीवस्य व्यापारेण अल्पज्ञत्वकारणात् सर्वदा न साधूनि भवन्ति ।

जीवस्य व्यापारेण जीवाधीनानि यद्यपि भवन्ति तथापि जीवस्य ब्रह्मयतत्स्थितिप्रवृत्तिकत्वात् ब्रह्माधीनानि एव । अतएव महामुनीन्द्रेण निम्बार्काचार्येण जीवस्य हर्यधीनत्वमुपदिष्टम् । जीवस्य हर्यधीनत्वे श्रुतिस्मृतिप्रमाणं स्पष्टं वर्त्तते । ऋग्वेदीयकौषीतकीब्राह्मणोपनिषदि श्रूयते यत् –

''एष एव साधुकर्म कारयति यं एतेभ्यो लोकेभ्य उर्ध्वं निनीषते ।

एष एवासाधुकर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते ।।''इति ।

(कौ.ब्रा. ३/९)

महाभारते चापि उक्तमित्थं रूपम् । श्रीमद्भगवद्गीतायां श्रीकृष्णेनापि उपदिष्टम् इत्थम् । तद्यथा –

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।

भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।। इति । (१८/६१)

तमेव शरणं गच्छ सर्वभावेन भारत ।

तत् प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।। (१८/६२)

प्रारब्धकर्मभोगनिमित्तम् । यद् यद् शरीरं जीवः गृह्णाति तदनुकूलानि कर्माणि तत्र तत्र स आचरति । प्रारब्धकर्मक्षयस्तु विना ईश्वरेच्छां न कदाचित् सम्भवति । अत एव जीवः तदधीन इति कथनेन ईश्वरस्य अनादि मायाधीन इति । माया साधारणतः दुस्तरा भवति किन्तु ईश्वरस्यानुकम्पातः कदाचित् तस्याः मायायाः प्रभावः न्यूनः सञ्जायते । कदाचित् च मायायाः विनाशः भवति । मायायाः विनाशनिमित्तं जीवकर्तृकम् ईश्वराधीनतारूपकर्म कारणं भवति । परमेश्वरस्य उपासनया कायमनोवाक्यैः तदवलम्बनद्वारा जीवस्य जीवनं सार्थकं भवति । एतस्मात् कारणात् जीवः ब्राह्मणः कृपणश्चेति संज्ञाद्वयं लभते । अवस्थानुसारं एतयोः द्वयोः एका संज्ञा तेन लभ्यते । शुक्लयजुर्वेदीयबृहदारण्यके गार्गीब्राह्मणे श्रूयते एतद् यथा – ''यः एतमक्षरं विदित्वा अस्माल्लोकात् प्रयिति स ब्राह्मणः यः एतदक्षरमविदित्वा अस्माल्लोकात् प्रयिति स कृपणः इति'' (शु.य.बृ.आ.) । भेदप्रसङ्गे एतस्मिन् विषये स्फुटि करिष्यते । जीवनं सार्थकीकर्तुं जीवस्य प्रयत्नः साधारणतः अपेक्षते । अनादिमायाबन्धनकारणात् जीवः मुह्यमानः भवति । एतस्मात् कारणात् भगवता श्रीकृष्णेन उक्तम् (गीता ५/१५) –

''अज्ञानेनावृत्तं ज्ञानं तेन मुह्यन्ति जन्तवः'' । इति ।

जीवः यथायथं स्वकर्म अर्थात् परब्रह्मसाक्षात्कारानुकूलं कर्म सम्पादयेत् चेत् अवश्यं शोकातीतो भवति । तदुक्तमथर्ववेदीयमुण्डकोपनिषदि (२/२/८) –

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।। इति ।

श्रीमद्भागवतेऽपि इत्थमुपदिष्टम् । तत्र चतुर्थपादः केवलं विलक्षणतासम्पन्नः । स एव पादः यथा – ''दृष्टएवात्मनीश्वरे'' इति । एतेभ्यः सोदाहरणं विचारेभ्यः जीवस्य सत्ता शततं वरीवर्त्तत इति सिद्धान्तः ।

******

द्वितीयोऽध्याय:

१. जीवस्वरूपम्

"अणोरणीयान् महतो महीयान्
आत्मास्यजन्तोर्निहितो गुहायाम् ।
तमक्रतु: पश्यति वीतशोको
धातुः प्रसादात् महिमानमात्मन: ।। कठोपनिषद् १/२/२०

इति श्रुतिवाक्यात् जीवस्वरूपं प्रतिपाद्यते । भगवत: ब्रह्मणश्चिदंशः यथा अग्ने: विस्फुलिङ्गा: तथैव अयं प्रकाशमान: अपि ब्रह्मैव स्व सत्ता नित्यत्वं प्रादुर्भावयति । अतएव आविर्भाव-तीरोभाव-स्वभावविशिष्टोऽयं जीव: इहसमाजे अनुभूयते। तद्यथा श्रूयते ऋग्वेदे (१/११३/८) –

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम् ।
व्युच्छन्तीं जीवमुद्दीरयन्त्युषा मृतं कं चन बोधयन्ती ।। इति ।

अयं जीव: नित्य:, पुराण:, शाश्वत: सर्वदा भवति । अस्य जन्ममरणादिव्यवस्था कदाचित् अपि कल्पयितुं न शक्यते । श्रूयते एतद्यथा ऋग्वेदे –

अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनि: ।। इति ।

(ऋ.वे. १/१६४/३०)

मन्त्रभागमिमं स्फुटीकरोति भाष्यकार: सायणाचार्य: यथा –

"अनत् प्राणनं कुर्वत जीवं जीवनवत् तुरगातु स्वव्यापाराय तूर्णगमनं सत् एजत् तत् शये शेते वर्त्तते । पश्चात् प्राणापगमनान्तरम् उक्त विलक्षणं सत् ध्रुवम् अविचलितं सत् पस्त्यानां गृहाणां मध्ये आ शेते च स्थाणुवत्तिष्ठति । आकार: पूरणो वा अथ जीवस्य वैलक्षण्यमाह । मृतस्य शरीरस्य सम्बन्धी

जीवः मर्त्येन मरणधर्मकेन शरीरेण सयोनिः पूर्वं समानोत्पत्तिस्थानः । यद्यपि जीवस्य न जन्मास्ति तथापि वपुषस्तत्सद्भावात् तत्सम्बन्धेनोपचर्यते । तदेवाह अमर्त्यः अमरणस्वभावः । "जीवापेतं वावकिलेदं म्रियते न जीवो म्रियते" (छा.उ.६/११/३) इति श्रुतेः । उक्तस्वभावो जीवः स्वधाभिः चरति पुत्रकृतैः स्वधाकारपूर्वकदत्तैः अन्नैश्चरति वर्त्तते इत्यर्थः" ।

अन्यापि ऋक् जीवस्य स्वरूपं प्रकाशति । तद्यथा – ऋग्वेदसंहितायाम् १/१६४/३७ मन्त्रे –

न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।

यदा मागन् प्रथमजा ऋतस्यादिद् वाचो अश्नुवे भागमस्याः ।। इति ।

आचार्यसायणः इमं मन्त्रं वेदार्थप्रकाशे विवृणोति यथा –

"अहं यदि वेदं यदपीदं विश्वम् अस्मि कृत्स्नः प्रपञ्चोऽप्यहमेवास्मि नामरूपांशम् अपरमार्थं त्यक्त्वा सर्वत्र अनुगतोऽस्ति भाति प्रियमिति योऽयं सच्चिदानन्दाकारोऽस्ति सोऽहमस्मीति न विजानामि । विविच्य नाज्ञासिषम् । परं शास्त्रजनितमिदमहमस्मीति ज्ञानं जातम् । अविवेक्यहमित्यर्थः । कार्यकारणयोरभेदात् कृत्स्नप्रपञ्चस्यापि ब्रह्मानन्दत्वेन ब्रह्मैकत्वावगमे प्रपञ्चजातमपि स्वस्वरूपमेव भवति । 'इदं सर्वं यदयमात्मा', 'ब्रह्मैवेदं सर्वं', 'आत्मैवेदं सर्वं', 'स ऐक्षत बहुस्यां प्रजायेय' इत्यादि श्रुतिभ्यः 'एकविज्ञानेन सर्वं विज्ञानप्रतिज्ञानात्' 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू. १/२/१४) इत्यादि उपपत्तिभिश्च प्रपञ्चस्य ब्रह्मानन्यत्वं सिद्धम् । यद्वा इव शब्दः उपमार्थः । यदि वा यदा परोक्षज्ञानं सर्वैकात्म्यरूपमानुभविकमस्ति तदिव तद्वदेवाहमस्मि । इदं सर्वमहमस्मीति ज्ञानं मे जातम् । अपि तु एतद्दार्ष्टान्तिकभूतम् । आनुभविकं सर्वात्म्यं यदस्ति तन्न विजानामि न प्राप्तोऽस्मि । शास्त्रजनितं सर्वात्म्यं जातं न तु आनुभविकमित्यर्थः । तत्र कारणमाह । यतोऽहं निण्यः । अन्तर्निहितनामैतत् । अन्तर्हितो मूढचित्तः । चित्तप्रत्यक्प्रवणताभावेन परिच्छिन्नः इत्यर्थः । तत्रोपपत्तिमाह । संनद्धः अविद्याकर्मभिः सम्यग्बद्धो वेष्टितः अतएव मनसा युक्तो भावना सहिष्णुना बहिर्मुखेन विक्षिप्तेन चेतसा युक्तः संचरामि संसारे ।

अथवा मनसा संनद्धश्चरामि । इन्द्रियपरवश एव सन् संसारे दुःखमनुभवामि । न सर्वात्म्यं जानामीति परिदेवते । यास्कोऽपि स्वीकृतवान् एतद् (निरुक्त ७/३)। जीवस्य स्पष्टं स्वरूपं प्रतिपादयति ऋग्वेदश्रुतिः यथा (४/४०/५) –

हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।

नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ।। इति।

अस्य मन्त्रस्य भाष्यं यदुक्तं सायणाचार्येण तद्यथा – "अनया सौर्यचर्याय एषोऽन्तरादित्ये हिरण्मयपुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेशः" (छा. उप./ १/६/६) इत्यादि श्रुत्युक्तो मण्डलाभिमानी देवोऽस्ति यश्च सर्वप्राणिचित्तरूपस्थितिः परमात्मा यच्च निरस्तसमस्तौपाधिकं परंब्रह्म तत्सर्वमेकमेवेति प्रतिपाद्यते । (ऋग्वेदे ४/४०/५ सायणभाष्यम्) । अतएव कठादिश्रुतिस्तु भगवद्गीतायां च अयं जीवः – "न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित् । अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे"(कठ १/२/१८) इति स्वरूपभूतः भवति । परब्रह्मणः परमेश्वरस्य तटस्थान्तर–ङ्गाबहिरङ्गा चेति याः तिस्रः शक्तयः विद्यन्ते तासु अयं जीवः तटस्थशक्ति–स्वरूपः । अन्तरङ्गशक्त्या बहिरङ्गशक्त्या च अस्य स्वरूपदर्शनं सम्भवति इति नचिकेतसे समुपदिशता भगवता यमराजेन कठोपनिषदि (२/१/१) कथ्यते –

"परां चिखानि व्यतृणत् स्वयंभूः तस्मात् परां पश्यतिनान्तरात्मन्।

कश्चित् धीरः प्रत्यगात्मानमैक्षदावृत्त चक्षुरमृतत्वमिच्छन् ।।"

जीवोऽयं उत्क्रान्तिगत्यागतिभिः दशाभिः व्यापृतः इति हेतोः सूक्ष्मातिसूक्ष्म–परिमाणविशिष्टः भवति । अस्य स्वरूपस्य प्रतिपादने सप्तविशेषणानि दर्शनशास्त्रेषु समुपलभ्यन्ते । अयमेव विशेषणसमुच्चयः अत्र पर्य्यालोच्यते ।

जीवस्य प्रथमं स्वरूपं भवति चिन्मयत्वम् । अतः अयं जीवः सर्वदा परब्रह्मणः चिदंशोभवति इति हेतोः भगवान् यथा चिन्मयः, प्रकाशमयः, ज्ञानस्वरूपः तथैवायं ज्ञानस्वरूपः भवति । अद्वैतवेदान्तिभिः द्वैतवेदान्तिभिः, द्वैताद्वैतवेदान्तिप्रभृतिभिश्च अयं ज्ञानस्वरूप इति उपदिष्टः । जीवात्मनः इयं

ज्ञानस्वरूपता केवलं सुषुप्तिदशायां भवति न तु सर्वदा । परब्रह्म तु सर्वदा ज्ञानमयं एव । अनेन प्रकारेण अनयोरुभयोः भेदः । जीवः ज्ञानस्वरूपभूत्वापि न तावत् परमेश्वर इव सर्वज्ञः किन्तु अल्पज्ञः । "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" (गीता ५/१५) इति भगवद्गीतावचनानुसारेण जीवज्ञानं प्रायशः आच्छादितम् एतस्मात् कारणात् भवति । अतएव जीवस्य ज्ञानस्वरूपे परब्रह्मज्ञानस्वरूपता इव कल्पना न कार्या ।

जीवस्य अपरं विशेषणं भवति हर्यधीनमिति । समस्तं जगत् हरतीति हरिः । एतत् सामर्थ्यन्तु निमित्तोपादानकारणभूते परब्रह्मणि एव वरीवर्त्ति। तस्य सामर्थ्यकारणात् तदेव ब्रह्म आनन्दमयं सन्मयं चिन्मयं च एव । आनन्दमयस्य तस्य ब्रह्मणः असीमत्वप्रतिपादने छान्दोग्यब्राह्मणं सनत्कुमार-नारदसम्बादं प्रस्तौति तत्रत्या प्रस्तुतिः जीवम् एव अभ्यासात् आनन्दमयं प्रतिपादयति जीवस्तु यदा स्वतन्त्रतां प्राप्तुमिच्छति तदा दुःखमेव उपभुंक्ते इति प्रतिपादयता कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषदि (३/१/२) श्रूयते यथा – "समाने वृक्षे पुरुषो निमग्नोऽनीशयाशोचितिमुह्यमानः । जुष्टं यदा पश्यत्यन्यमीश मस्य महिमानमिति वीतशोकः " इति । जीवस्य कर्तृत्वं तु हर्यधीनमेव । स्वतन्त्रतया तेन किमपि कर्त्तुं न पार्यते । एतदेव प्रतिपादयता महर्षिणा उपदिश्यते ऋग्वेदीयकौशितकीब्राह्मणोपनिषदि (३/९) यथा – "एष एव साधुकर्मकारयति यं एतेभ्यो लोकेभ्यः उर्ध्वं निनीषते" इति । महाभारतेऽपि उक्तम् –

नहि कश्चित् अयं मर्त्यः स्ववशः कुरुते क्रियाः ।
ईश्वरेण प्रयुक्तोऽयं साध्वसाधु च मानवः ।। इति ।

हृद्देशे विराजमानः परमपुरुषः इमं जीवपुरुषम् अनेन भावेन संरक्षति येन तेन तदिच्छाविरोधेन किमपि कर्त्तुं न शक्यते । अर्जुनाय उपदिशता भगवता श्रीकृष्णेन इदमेव उक्तं श्रीमद्भगवद्गीतायां यथा –

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।। (१८/६१)

जीवस्य स्वरूपम् अन्यत् वर्त्तते शरीरसंयोगवियोग योग्यता । प्रमेयपदार्थेषु

शरीरमन्यतमम् । तस्य कार्यं सुखदु:खेच्छानुभव: तदनुभवश्च शरीरधारणपरित्यागेनैव सम्भवति । अहंकारेण महाभूतपञ्चकेन च समुत्पद्यमानशरीरं भोगाधिष्टानं भवति । तदेव शरीरं विनाशशीलम् । यावत् पर्यन्तं तस्मिन् शरीरे जीवकृते कार्यं वर्त्तते तावत्पर्यन्तं तस्य दृश्यता तदभावे जीवस्य घटान्तरत्वं सिद्धमेव । घटान्तरप्राप्तित: पूर्वं तस्य जीवस्य लिङ्गशरीरे एव अवस्थिति: । लिङ्गशरीरात् क्रमश: स्थूलशरीरे प्रवेश: जायते । एवं प्रकारेण सूक्ष्मस्थूलशरीरधारीजीव: स्वकर्मवशत: बारम्बारम् आविर्भावं तीरोभावं च लभते । तस्य आविर्भाव: कदाचित् जङ्गमयोनौ कदाचित् च स्थावरयोनौ च सम्भवति । जीवस्य इयं गति: अपि स्वकृतपुण्यपापप्रभाववशत: सम्भवति । तदुपदिष्टं भगवता यमराजेन कृष्णयजुर्वेदीयकठोपनिषदि (२/२/७) यथा –

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिन: ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथा श्रुतम् ।। इति ।

योनिप्रवेश: केवलं जीवात्मन: सम्भवति न तु परमात्मन: । जीवात्मन: इयमेव दशा केवलं वद्धदशायां भवति ।

जीव: नित्य:, चेतन: ईश्वराधीनसामर्थ्यवान् अपि अणुपरिमाणविशिष्ट: भवति । तथा च श्रूयते – ''अणुर्ह्यौ स आत्मा'' इति । किम्भूत: अणुपरिमाणविशिष्ट: जीवो भवति इति अपेक्षायां श्रूयते कृष्णयजुर्वेदीयश्वेताश्वरोपनिषदि (५/९) यथा – ''बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीव: स विज्ञेय: स चानन्त्याय कल्पते'' इति । अणुपरिमाण अयं जीवात्मा केवलं चेतसा एव उपलब्धुं शक्यते । तथा च श्रूयते – ''एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राण: पञ्चधा संविवेश'' इति । कृष्णयजुर्वेदीयतैत्तिरीयश्रुतौ विज्ञानमय: अयमात्मा परोक्षेण अनेन स्वरूपेण एव उपदिष्ट: । एतस्यैव अणुत्वे ''उत्क्रान्तीगत्यागतीनामिति'' ब्रह्मसूत्रवचनमपि (२/३/१९) समर्थकं भवति । उत्क्रान्तिगत्यागतिश्रवणनि तु जीवस्य परिच्छेदं प्रापयन्ति। स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते।

जीव: प्रारब्धकर्मानुसारं शरीरधारणं करोति । प्रतिशरीरं च अस्य जीवस्य

कार्यं भिन्नं वर्त्तते । तस्य एकत्वकल्पनायां सर्वेषां प्राणीनां समानसुखदुःखप्राप्तिशङ्का आपद्येत । अतएव जीवः प्रतिदेहं भिन्नः । एतस्मात् कारणात् जीवः असंख्यः । तस्य अनन्तत्वं निर्दिष्टं द्वैताद्वैतदर्शनशास्त्रे । साधुकर्माचारिणां एकदैव मुक्तिलाभापते । सर्वेषां जीवानां मुक्तिः भवेत् इति शङ्का निरासः अनेनैव साधितः । अर्थात् जीवानाम् अनन्तत्वात् साधूनां जीवानां मुक्तौ अपि असाधूनां जीवानां संसारेऽस्मिन् शरीरधारीत्वेन विराजमानता वर्त्तते । अनेनैव जीवाः यथा रेणवः असंख्याः तथैव अगणिताः भवन्ति । जीवस्य सर्वमिदं वैशिष्ट्यपूर्णं स्वरूपं वेदान्तकामधेनुनवनीतसुधाव्याख्यायाः तत्वसुधाख्यटीप्पण्यां आचार्यविश्वनाथस्वाईमहाभागेन प्रतिपादितम्, तत्रैदं समवलोकनीयम् । कस्तावज्जीवः? किं तस्य स्वरूपम्? इति प्रश्नस्य समाधानं सरस्वतीरहस्योपनिषदि (१८) यथा –

साक्षिणः पुरतो भानं लिङ्गदेहेन संयुतम् ।
चितिच्छाया – समावेशाज् जीवः स्याद् व्यावहारिकः ।।

२. जीवभेदः –

परब्रह्म यया सत्या विश्वमिदं पाति सा माया प्रकृतिरितिशब्देन उच्यते । भगवतः प्रत्यक्षपरोक्षसम्पर्कवशात् सकलमिदं कार्यं सम्भवति । एषा प्रकृति सत्वरजस्तमोगुणैः परिपूर्णा । अस्याः प्रकृतेः निगूढसम्पर्कात् सर्वेषां प्राणीनां देहधारणसम्भवः । अतएव देहधारिणः जीवाः गुणत्रयपरियुक्ताः भवन्ति । किन्तु सर्वे जीवाः समभावेन त्रिगुणात्मिकाः न भवन्ति । तेषु कश्चित् सत्वाधिक्येन, कश्चित् रजाधिक्येन, कश्चित् तमाधिक्येन वर्तते । गुणवैषम्यात् जीवेषु वैषम्यं परिलक्ष्यते । अतएव सत्वप्रधानाः, रजः प्रधानाः, तमःप्रधानाश्चेति भावेन लक्षणयुक्ताः जीवाः भवन्ति । येषां रज आधिक्यं वर्त्तते ते उभयगुणसम्पन्ना भवन्ति । सत्वप्रधानाः सात्विकाः कथ्यन्ते । तमः प्रधानाः तामसाश्च भवन्ति । सत्वप्रधानाः जीवाः मुक्ताः, रजः प्रधाना जीवस्तु वद्धमुक्तजीवाः, तमःप्रधाना जीवाश्च वद्धाः जीवाः भवन्ति । पुनश्च एतेषां जीवानां कर्मफलगतिविचारे इहजन्मनि आचरितकर्मविचारे जीवानामनेकत्वं

गुणोपबद्धभावनया विविधप्रकारकत्वञ्च स्वीक्रियते । मुक्ता अपि जीवाः भक्ताः । केचन वद्धमुक्ताः जीवाः भक्ताः इति कथयन्ति । सत्वादीनां गुणानां तारतम्येन पृथक् पृथक् भावान्तिताः एते जीवाः पुनश्च नित्यबद्धा नित्यमुक्ताः भाविश्रेयस्का प्रभृतयः अनेकप्रकाराः भवन्ति । अद्वैतभावनया एतेषां एकत्वे यथा विचारः प्राप्यते अपरपक्षे अनेकत्वविचारे अर्थात् द्वैताद्वैतसिद्धान्तानुसारेण विचारे तथैव शास्त्रवचनं प्रमाणत्वेन समुपलभ्यते । मूलतः विचारे मुमुक्षुः बुभुक्षुश्चेति भेदेन द्विविध जीवः स्वीक्रियते । बुभुक्षुः नित्यसंसारी, मुमुक्षुश्च नित्यं वैराग्यसम्पन्नः । यदा वुभुक्षुः हृदिस्थिताः सर्वाः कामनाः प्रमुच्यन्ते तदा ते अपि जीवाः मुमुक्षुजीवपदवाच्याः भवन्ति । तदुक्तं श्रुतौ –

''यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदिश्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥''

(कठ उप. २/३/१४)

तथा च – ''मुमुक्षुर्भूत्वा आत्मनैवात्मानं पश्येत्'' ।

परंज्योतिरूपं सम्पद्य स्वेनरूपेण अभिनिष्पद्यते इति । एतेभ्यः दृष्टान्तेभ्यः विविधगुणतारतम्यवशतः प्रकाशितः आविर्भूतश्च जीवः तत् निर्दिष्टं लक्षणं एव निर्दिष्टपर्यायभूतः भवति । नित्यसंसारी जीवस्तु ब्रह्मसाक्षात्काराभावात् अन्यथा वर्त्तते तथा चोक्तं बृहदारण्यके –''एतमक्षरमविदित्वा यः अस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे'' । इति श्रुतत्वात् । मायानुसारेण विविधसंज्ञावद्धाः जीवाः वस्तुतः परमात्मनः ब्रह्मणः सकाशात् भिन्ना अपि अभिन्ना भवन्ति । तेषां कार्यज्ञानम् एव वैभिन्यं प्रतिपादयति । जीवः यदा स्वविवेकवुद्ध्या भेदबुद्धिं प्रतिपादयति तदा उपासनानिमित्तं केवलम् अन्यथा तस्य जीवस्य स्वतन्त्रप्रकाशः न सम्भाव्यते । जीवः स्वेषु भेदसम्पन्नेषु जीवेषु यत् वैभिन्यमनुभवति तत् सकलं तस्य अनीशत्वकारणात् एव । जीवपरमात्मनोः उभयोर्मध्ये वद्धजीवदशां प्रदर्शयन्ति । ऋक्संहिता प्रतिपादयति यथा – ''द्वासुपर्णा सयुजासखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति ।। (ऋ.वे. १/१६४/२०)। एषा श्रुतिरपि

अथर्ववेदीयशौनकीयशाखामुण्डकोपनिषदि च श्रूयते । भेदबुद्धिसम्पन्नस्य जीवस्य अनीशत्वदशा प्रतिपाद्यते मुण्डके (३/१/२) यथा – ''समाने वृक्षे पुरुषो निमग्नोऽनिशयासोचतिमुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः'' ।

एकस्मिन् शरीरे जीवब्रह्मणोः सहावस्थानकारणात् उभयोः वद्धावस्थापन्नत्वं कदाचित् कल्पयितुं शक्यते । किन्तु जीवस्तु नियम्यः परमस्तु नियामक इति दर्शनेऽपि उभयोः निराकरणत्वं श्रुतिसिद्धमेव । केवलं संसारभोगवासनापरिप्लुतः जीवः वद्ध इति शास्त्रकारैः सिद्धान्तितम् । अद्वैतवादिनः श्रीशङ्कराचार्यपादाः प्रस्थानत्रय्याम् – ''जीवो नाम परमदेवतायाः आभासमात्रम्'' इति प्रतिपादनावसरे – ''अस्ति भाति प्रियं रूपं नाम चेत्यंश पञ्चकम् । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्'' इति सरस्वतीरहस्य (मन्त्र ३२)श्रुत्याधारेण जीवानां यत् सार्वकालिकं मुक्तत्वं प्रतिपादितं तत् मृग्यम् । वस्तुतस्तु श्रीमद्भागवते बद्धमुक्तादिभेदेन जीवानां परिगणनेन जीवाः स्वकर्मफलवशतः तद्दशापन्ना भवेयुः इति भगवद्वचनबोधः । वस्तुतः ''श्रोतव्यो मन्तव्यो निदिध्यासितव्यः''(बृहदा.उप. ४/५) इति जीवधर्मवृत्तिमाधारीकृत्य विचारः क्रियते चेत् एतद् ज्ञायते यत् – नहि सर्वैः जीवैः सकलं कर्म समानभावेन संसाधयितुं शक्यते न वा चिन्त्यते । शुक्लयजुर्वेदे (४०/३) ''ये के चात्महनो जनाः'' इति उपदेशश्रवणात् जीवानां वैभिन्न्यं गुणभेदेन सम्भवति इति ज्ञातुं पार्यते । संसारवासनावद्धः जीवः मूलतः भवति । यतोहि तथा प्रवृत्तिः तस्य जीवस्य आविर्भाविनैव सह सम्भवति । केवलं एतदेव कथयितुं शक्यते यत् जन्मग्रहणानन्तरं जीवः बद्धः भवति । तस्य बन्धनकारणं मनः तं विविधेषु अकार्येषु प्रवर्त्तयति । अकार्यरूपं तत् पतनीयं कर्म आचरन् सः बद्धः भवति । तस्मात् मुक्तिनिमित्तं यदा तस्य इच्छा जागर्ति तदा स ईश्वरार्पणबुध्या भवति चेत् मुमुक्षुः इति पदवाच्य भवति । परब्रह्मतुल्यं साम्यम् अधिकर्त्तुमर्थात् सत्वगुणसम्पन्नः भवितुं यदा सः इतरजीवात् पृथक् भावात्मकजीवः भवति तदा तस्य मनसि या ग्लानिर्जायते सा एव असाधारणी । ततः ग्लानितः अर्थात् तस्मात् पापात् विमुक्तिनिमित्तं सः यथायोग्यं देवं स्तौति । तद् यथा श्रूयते

ऋग्वेदसंहितायाम् (१/१०४/६) –

स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।

मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महते इन्द्रियाय ।। इति ।

संसारदृष्ट्या जीवानां वैभिन्यं किन्तु वास्तवतः सर्वे खलु जीवाः भगवत् चिदंशभूताः । अल्पज्ञाः भवन्तु अपि ते जीवाः सर्वज्ञेन परमात्मना सह साम्यं अधिकर्त्तुं समर्थो भवन्ति । ''ममैवांशो जीवलोके जीवभूतः सनातनः'' इति श्रीमद्भगवद्गीतावाक्यं जीवस्य चिदंशत्वं परब्रह्मणः अंशित्वं प्रतिपादयति । अतएव विविध सञ्ज्ञोबद्धा जीवाः विभिन्नाः इति प्रतीयमाना अपि सर्वव्यापकसर्वेश्वरपुरुषोत्तमव्यापारदृष्ट्या एकत्वं भजते । अतएव वेदान्तदर्शने अवस्थानुसारेण जीवानां बद्धमुक्त–भक्तादिभेदेन याः याः विविधसंज्ञाः समुपलभ्यन्ते । तत्त्वतः सा सर्वाः संज्ञाः परमेश्वरे परब्रह्मणि अन्तर्भवन्ति एव । भेददृष्ट्या बहुजीववादः स्वीक्रियते चेत् तद्द्वारा एकस्मिन् एव समये सर्वेषां जीवानां मुक्तिः न भवेत् वारंवारं प्रयासे कृते अपि इत्येवमवधारणीयं भवति ।

भेदाभेददर्शनमतिरिच्य अन्यत्र जीवभेदसम्बन्धे यः खलु विचारः समुपलभ्यते स एव विचारः परमेश्वरात् वैभिन्यज्ञापनार्थमेव । प्रकृतपक्षे जीवानाम् अनेकत्वं असंख्यत्वञ्च जीवभेदज्ञापने परमं कारणं भवति । अन्तिमे अयमेव सारः कथयितुं शक्यते यत् संसारे कार्यदृष्ट्या अर्थात् ब्रह्मज्ञानाहरणार्थं प्रवृत्ताः सर्वे जीवाः भवन्ति । तेषु केषाञ्चन तद्ज्ञानं सीमितम्, केषाञ्चन च पर्य्याप्तम् । ये खलु पर्य्याप्तज्ञानिनः ते स्वरूपे परब्रह्मणि मिलनार्थं नित्यं भाविश्रेयस्काः भवन्ति । तेषां च बन्धनकारणं या खलु माया इति कथ्यते सा तेषु जीवेषु भेदं समुत्पाद्य तेषां विविधभावेन प्रतिपादनात् तेषाम् अनेकता वैलक्षण्येन प्रतिपादयतीति । उपनिषत्सु जीवम् आत्मानं ब्रह्मवासमाश्रित्य विन्यस्तानां विचाराणां पर्यालोचनादिदं विज्ञायते यत् तेषु कश्चन वास्तवो भेदो न भवति । यः कोऽपि भेदः प्रतिभासते सोऽविद्यामूलक एव ।

३. जीवधर्मः –

प्राणिमात्रं जीवः भवति । जन्मत आरभ्य मरणं यावत् तेन यत् यत् कार्यं

तत् तत् जीवधर्म इति पदेन व्यपदिश्यते । जीवस्य कर्त्तव्यं भवति एवंभूतं यत् तस्य संरक्षणार्थमेकमपरं च मुक्तिप्राप्त्यर्थम् । उभयमेतत् कर्म आर्यशास्त्रवेदसम्मतम् । वैदिकं कर्म द्विविधम् – प्रवृत्त्यात्मकं, निवृत्त्यात्मकञ्च । यत् कर्म सुखादभ्युदयप्राप्तिकारणं भवति तदेव प्रवृत्त्यात्मकं कर्म धर्मसञ्ज्ञितम् । तथैव च यत् कर्म निश्रेयससाधनकारणं अर्थात् निष्कामं तदेव निवृत्त्यात्मकं सन्यासमिति अपरपर्य्यायविशिष्टम् । उभयो: धर्मयो: फलं तु भिन्नं तत् फलं चोक्तं मनुना (१२/९०) –

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥

उभयमेतत् कर्म जीवधर्मरूपेण प्रसिद्धिं प्राप्नोति । यद्यपि प्रवृत्तं कर्म जीव: आचरति तथापि तदेव कर्मजातं सत्वरजस्तमसां सम्पर्कीतत्वात् तदनुरूपं फलकारकं भवति । अतएव विशिष्टं भवति निवृत्यात्मकम् । यद्यपि प्राणप्रभृति शक्तिदृष्ट्या जीवस्य शक्ति: कल्प्यते तथापि सेयं ईश्वरनियन्त्रिता एव । इत्थमपि च जीवेन परमात्मकारणात् स्वतन्त्रतया किमपि कर्त्तुं न पारयति ।जीवस्य विशेषत: निवृत्त्यात्मकस्य मुमुक्षुभूतस्य जीवस्य धर्मरूपेण एकमेव आयाति तदेकमेवकर्त्तव्यमिति । तच्च कर्त्तव्यं निरवच्छिन्नभावेन परमेश्वरस्य प्रपत्तित्वम् ।

जीव: बुभुक्षुर्भवतु मुमुक्षुर्वा वैदिकदर्शने तस्य कर्मफलदिशा तदुपलब्धि: एव साध्वी भवितव्या । सा च उपलब्धि: ब्रह्मचिन्तनात्मिका । एतदेव श्रीपुरुषोत्तमप्रापणार्थं बृहत्तमगुणज्ञानार्थमभिप्रेतमेव । जीवस्य एतद् कर्त्तव्यं मुख्यमेव । एतच्च कर्त्तव्यं जीवस्य अन्तश्चेतना जागरणात् परं सम्भवति । जन्मजन्मान्तरक्रमेण इह जन्मनि जीवधर्मस्य अपेक्षितत्वात् जीवधर्म: वैशिष्ट्र्यपूर्ण: । "स जीवो यत् पुनर्भव" इति श्रीमद्भागवतोक्तं (१/३/३२) वचनम् एवात्र प्रमाणम् ।

जीव: यत् किञ्चित् साधुरूपेण करोति तदेव कर्म तस्य प्रतिभाद्योतकम् । यथा राष्ट्रमुख्य: इतरा: प्रजा: संरक्षति तदा जीवोऽयं स्वकृतकर्त्तव्यपर्य्यालोचने कालविशेषवशात् संपृक्तो भवति । जीवस्य इयमपि दशा साधारणत: सम्भवति,

ज्ञानस्वरूप: भूत्वापि जीव: सर्वेषां ज्ञानानां विकासार्थम् ईश्वरप्रणिधानं कुर्य्यात् । अतएव ईश्वरप्रणिधानं मुख्यकर्मइति विविच्य जीव: कथंचित् प्रकारेण तेन सह स्थातुं चेष्टते । तस्य चेष्टा च पूर्वोक्तकर्मफलाधारेण इतश्च प्रवृत्तिनिवृत्यात्मकप्राथमिककर्मद्वारा संसाधयितुं शक्यते । प्रवृत्त्यात्मकदृष्ट्या जीव: यत् किमपि करोति तदेव सकलं कर्म धर्मलाभार्थमुदिष्टमेव । जीवस्य साध्यसाधनादिकर्मजातं परमेश्वरविधानत: पुष्टिं लभते । निवृत्त्यात्मके कर्मणि जीवस्य मुमुक्षुत्वप्राप्तिकारणं ईश्वरेच्छा भवति । ईश्वरेच्छालाभनिमित्तं निरवच्छिन्नभावेन चेष्टा करणीया । निरवच्छिन्नभावेन चेष्टा च साध्यसाधनभक्तिरूपा भवितव्या । यत् किञ्चित् भवतु नाम तस्य परब्रह्मण: कृपालाभनिमित्तं साधनमेव जीवस्य परमो धर्म: । यद्यपि जीव: अधिकारवशत: कदाचित् किञ्चित् अधिकर्तुम् इच्छति एवं च तत् इप्सितं कर्म ईश्वरार्पणबुद्ध्या आरभ्यते चेत् एतदेव प्रकृष्टं जैवधर्मरूपं भवति । अतएव –

"असुर्या नाम ते लोका अन्धेन तमसावृता: ।

ताऽस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना: ।। (४०/३) इति शुक्लयजुर्वेदश्रुतिवचनेन अनात्मज्ञस्य सर्वप्रकारहानिश्रवणात् निरवच्छिन्नभावेन परब्रह्मोपासनं जीवस्यैव कर्त्तव्यम् । एतदेव जीवधर्म इति प्रसिद्धम् ।

चिदंशक: जीव: अपि चितुसत्तासंरक्षणे कदाचित् असमर्थ: भवति । तच्च असौविध्यं तस्य अनिसत्वकारणात् एव । एतत् मनसि निधाय जीवसत्तापरिज्ञानार्थं तेन सततं यत्नः करणीय: । किन्तु "पराञ्चिखानि" इति कठश्रुतिदिशा तस्य एव जीवस्य बन्धनसत्त्वात् स एव जीव: स्वात्मानं न जानाति । स्वात्मसम्बन्धे अज्ञानमेव जीवस्य पतनीयं कर्म । तत: समुद्धारार्थममृतत्वप्राप्तिनिमित्तं च जीवेन सर्वेषु भूतेषु परब्रह्मसत्ता द्रष्टव्या । सर्वत्र परब्रह्मसत्ता दर्शनमेव जीवस्य परमो धर्म: । एतदर्थं ईशश्रुति: प्रतिपादयति यथा -- (४०/६-७)

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न वि जुगुप्सते ।।

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।। इति ।

शरीरधारी अयं जीवः प्रायशः मुह्यमानः दृश्यते । तस्य मोहकारणं काम एव । काम एव दुष्पूरः अनलसदृशः । सङ्गवसतः यः कामः जायते तस्मात् कामात् निवृत्तिप्राप्त्यर्थं जीवचेष्टा समधिकाभूत्वाऽपि जीवकृते तत् फलं न्यूनं भवति । यतोहि उक्तं भगवता श्रीकृष्णेन गीतायाम् –

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।

सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ।। (२/६२)

क्रोधाद्भवतिसम्मोहः सम्मोहात् स्मृतिविभ्रमः ।

स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।। (२/६३)

कामनावशतः इयंपरिणतिः जीवसत्ताविलयकारिणी भवति । जीवसत्तायाः विलयः संसारोच्छेदशङ्कां जनयति । जीवः यथाकालं ज्ञानं परिपूर्णं भवेत् चेत् इयं दशा तेन लब्धुं न पार्यते । कामना जर्जरितः भूत्वा जीवः अपरेषां विनाशाय प्रवर्त्तते । वस्तुतः अपरेषां जीवानां कदाचित् विनाशेन सह, कदाचित् च विनाशात् पूर्वं, कदाचित् च विनाशात् अनन्तरं तस्य विलयो भवति । तस्मात् उच्यते श्रीमद्भागवत–“कामेष्वन्तायकल्प्येत”। श्रीमद्भगवद्गीतायाम् –

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।

क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ।। (२/४३)

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।। (१६/१८)

अनेकचित्तविभ्रान्ता मोहजालसमावृत्ताः ।

प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।। (१६/१६)

कामव्यापकता निरूपणावसरे कामस्वरूपिणीं स्त्रियं प्रतिपादयन्त्या शुक्लयजुर्वेदश्रुत्या उपदिश्यते यत् – “कोऽदात्कस्मा

अदात्कामोऽदात्कामायादात्कामो दाता कामः प्रतिग्रहीता कामैतत्ते'' (शु.य.माध्यन्दिनसंहिता ७/४८) इति । विनाशकारणं कामं जीवः सर्वदाहेयत्वेन परित्यजेत् चेत् तदा न केवलं तस्य जीवविशेषस्य अपि च अनेकेषां जीवानां महान् लाभो भवेत् । अतएव कामक्रोधादिशत्रवः जीवेन परित्याज्याः इत्येवं भवति जीवधर्मः । यदुक्तं गीतायाम् –

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ।। (१८/५३)

''हृदि ह्येष आत्मा'' इति जीवात्मस्थितिर्निरूपिता । तस्य प्रवृत्तिः प्रारब्धानुसारिणी भवति । किं तावत् कार्यं किं च अकार्यं एतत्सर्वं निरूपयितुं सः चेष्टते । कदाचित् शास्त्रज्ञानं विद्वांसो वा तत् सहायकरूपेण न मिलन्ति । तद्दशायां हृदि विवेचना तत् कृते क्रियाक्रियाज्ञानं निर्दिश्यति । तच्च क्रियाक्रियाज्ञाननिर्देशनं शास्त्रप्रमाणवत् ऋषिभिः मुनिभिश्च स्वीक्रियते । अतएव विवेकाश्रय एव जीवधर्मो भवति । उपदेशप्रदानार्थं विद्वान् ब्राह्मणः अपेक्षते । कदाचित् च सः सामान्यज्ञानी तथा तथाकथितो वा भवेत् । तद्दशायां संकोचं विना तत् परामर्शग्रहणं क्रियते चेत् अनेकसमस्यासमाधानं भवति । धर्मशासने केवलं विदुषः ब्राह्मणस्य एवाधिकार इति हेतो जीवः तमेव ब्राह्मणमनुवर्त्तते । अनेन प्रकारेण सर्वं ज्ञात्वा जीवः तच्छाशनवशात् समीचीनक्रियाकलापादिषु प्रवृत्तो भवेत् चेत् तस्य कृते महान् आनन्दः उपलब्धः भवेत् । अतएव तत् भूत विद्वद्ब्राह्मणानुगमनं जीवस्यैव परमो धर्मः । अपशुद्राधिकरणं परोक्षेण एतदेव अनुशास्ति । एतदर्थं स्मर्यते मनुस्मृतौ भगवता मनुना यथा –

न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति ।
नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनम् ।। (१०/१२६)

अनेन प्रकारेण जीवकृते सर्वं कर्त्तव्यमुपदिष्टं प्राचीनैः मुनिभिः ऋषिभिश्च । उपदेशप्राप्त्यर्थमधिकारी अयं जीवः स्व हितार्थाय जगद्धिताय च एतद् धर्मरूपेण आचरेत् इति ।

"तरति शोकं आत्मवित्" इति छान्दोग्यब्राह्मणे श्रूयते । आत्मेति कथनेन "सर्वं खल्विदं यदयं आत्मा" इति श्रूयते । आत्मपदव्यवहारे प्रथमतः पित्रोः अन्तर्भावः भवति । आत्मनः सकलं सांसारिककर्म पुण्यं भवतु तदर्थं अभिलषति यदा जीवः तदा तेन साधु आचर्यते । तस्य साध्वाचरणस्य प्रगतिरपि वर्त्तते । शरीरत्यागं यावत् तदेव कर्म तत् पक्षतः प्रचलितं भवति । तस्य दुर्बलावस्थासंघटनानन्तरं तदात्मीयः पुत्रः तत् सकलं कर्म पूण्येन मार्गेण वर्धयति। स एव पुत्रः तत्र प्रतिनिधिरूपेण कार्यनिर्वाहं करोति । श्रूयते एतद् यथा ऋग्वेदीयायाम् ऐतरेयश्रुतौ – "श्वस्यायं आत्मा पुण्येन प्रतिधीयते" । ऐतरेयब्राह्मणं एतस्मात् कारणात् पुत्रं स्वपितृपुरुषाणां ज्योतिस्वरूपम् उपदिशति। तत् श्रुतिवचनं यथा – "ज्योतिर्ह पुत्रः परमे व्योमन्" (ऐ.ब्रा.) । एतस्मात् कारणात् ऋग्वेदीयं कौशितकीब्राह्मणं "आत्मा वै पुत्रनामासि स जीव शरदः शतम्" इति उपदिशति । अतएव पुत्रः पितृदेवः भवितव्यः पुत्ररूपेण प्रवर्त्तमानः जीवोऽयं एवं प्रकारेण धर्माचरणशीलः भवेत् चेत् संसारेऽस्मिन् तस्य प्रकाशनं अवश्यं सफलं भवेत् । जीवः स्वकल्याणाय पितृलोकान् प्रार्थयेत् । तच्च प्रार्थनं श्रूयते शुक्लयजुर्वेदवाजसनेयसंहितायाम् –

पुनर्नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रात ꣡ सचेमहि ।। इति ।। (३/५५)

"जायमानो वै पुरुषः पाप्मभिः संसृज्यते" इति श्रुतिः । तस्यैव जीवपुरुषस्य कर्मणि एतत् प्रतिफलितं भवति आहारनिद्राभयमैथुनप्रभृतिरूपेण । जीवस्य एतानि कर्माणि जन्मनः प्रभृति संघटितानि भवन्ति इति श्रुतिस्मृतिसाहित्येषु निर्वाधमुक्तमस्ति । जीवः जगति संसरणावसरे यत् पश्यति, यत् जुहोति, यत् वा तपति तत् सर्वं परब्रह्मरूपनिमित्तोपादानकारणात् सम्भवं भवति । जीवस्य अनया प्रवृत्त्या यत् यत् सम्भाव्यते तत् सर्वं कर्मानुरूपमेव । एतद् अभिलक्ष्य नचिकेतसे उपदिशता यमराजेन उपदिश्यते यत् –

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयान्ति यथाकर्म यथाश्रुतम् ।।

(कठ.उप. २/२/७)

कठश्रुते: इदं वाक्यम् अपरेण वेदवचनेन सह समञ्जसं याति । तस्यां कठश्रुतौ जीवस्य निरवच्छिन्नभावेन कार्यजातम् आख्यायते यत् जीव: यया ईक्षणशक्त्या स्वरूपतां प्राप्त: तेनैव प्रकाशित: भवति । तस्मिन् स्वरूपे सृष्टिक्रम इव तन्मात्राऽधारेण ब्रह्मप्रकाशा: प्रकाश्यन्ते । ब्रह्मशक्त्या अभिभूत: जीव: कदाचित् स्वस्थितिं न जानाति अपरस्य वा का कथा । किन्तु जीवेन एतत् एव कर्त्तव्यं यत् तस्य परोक्षानुभूति: येन केनचित् प्रकारेण भवितव्या । जीव: स्वभावत: अदृश्यपुरुषोऽपि ईश्वरनियन्त्रित: सन् स्थानविशेषे आचरति यत् श्रेष्ठं कर्म तदेव परवर्त्तिनि अवसरे जीवधर्मरूपेण परिचित: । जीवस्य स्वभावसम्बन्धे यमराजेन कथ्यते कठश्रुतौ (२/१/१) यथा –

पराञ्चिखानि व्यतृणत् स्वयम्भू: तस्मात् परां पश्यतिनान्तरात्मन्।

कश्चिद्धीर: प्रत्यगात्मानमैक्षत् आवृत्त चक्षुरमृतत्वमिच्छन् ।।

अनया उक्त्या जीवस्य उभयथा स्वरूपं कर्त्तव्यं च निरूप्यते । प्रत्यगात्मदर्शनं तु जीवकृते अन्तिम: धर्म: । किन्तु व्यवहारजगति जीव: इतस्तत: प्रवृत्तस्सन् धर्माभासम् आचरति । प्रत्यगात्मदर्शनार्थं यानि अन्तरायपराणि भवन्ति तानि अपि कथंचित् स्थिरतां गच्छन्ति यदा अन्तर्मुखीप्रक्रिया अर्थात् प्रत्यगात्मदर्शनं समनुष्ठीयते । जीव: प्रत्यगात्मन: स्वरूपं स्पष्टरूपेण न जानाति तथापि भक्तिसाधनार्थं शरणागतिसाधनार्थं च अपेक्षितानि सर्वाणि तेन अवलम्बनीयानि ।

जीव: जानाति यत् तस्य हृदये ईश्वर: विराजते । तस्य ईश्वरस्य विराट्रूपेण प्रकाश: मूलमेव आसीत् । शुक्लयजुर्वेदसंहितायां एतत् विस्तरश: श्रूयते । यथा –

ततो विराडजायत विराजो अधि पूरुष: ।

स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुर: ।।

(शुक्ल.यजु. ३१/५)

अर्थात् सर्ववेदान्तवेद्य: परमात्मा स्वमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र

जीवरूपेण प्रविष्ट इव ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतद् श्रूयते अथर्वणोत्तरतापिनीये – ''स वा एष भूतानीन्द्रियाणि विराजं देवता: केशांश्च सृष्ट्वात्र प्रविष्ट इव विहरति'' इति (नृसिंहता. २/९) अथो भूमिसृष्टेरनन्तरं तेषां जीवानां शरीराणि ससर्ज । जीव: यद्यपि स्वेच्छाबलेन कर्माणि कुरुते तथापि तेन अवश्यं ज्ञातव्यं यत् तस्य नियन्तु: इच्छानुसारेण तेन सर्वं साध्यते । नियन्तु: परब्रह्मण: अधीनतां स्वीकुर्वन् जीव: परब्रह्ममय भवति । संसार-भोगवासनापरित्यागेन जीव: तत् परमेश्वरदर्शनं कथंचित् लभते । यद्यपि प्रवृत्तिनिवृत्त्यात्मकं द्विविधं कर्म धर्मरूपेण जीवकृते उपदिश्यते तथापि जीव: पारमार्थिकदृष्ट्या निवृत्त्यात्मकं कर्म सर्वदा अनुतिष्ठेत् । निवृत्त्यात्मककर्म-सम्पादनं तु जीवकृते परमो धर्म: । यद्यपि ''यतोऽभ्युदयनि:श्रेयससिद्धि:'' एव धर्म इति भगवता कणादेन वैशेषिकदर्शने सूत्रितं तथापि नि:श्रेयस धर्मसाधनार्थं स: मुहुर्मुहु चेष्टां कुर्य्यात् । ''पुण्यजितो लोक: कर्मजितो वा क्षीयते । क्षीणे पुण्ये मर्त्यलोकं विशन्ति'' इति गीतावचनानुसारेण (९/२१) प्रवृत्त्यात्मकानि एतानि कर्माणि साग्रहं सर्वदा न सम्पादनीयानि किन्तु निवृत्त्यात्मकानि एव । प्रवृत्त्यात्मको निवृत्त्यात्मकयो: कर्मप्रारूपप्रकाशनावसरे एतत् तत्वत: ज्ञातुं शक्यते यत् उपास्य रूपस्य परब्रह्मण: नितरामाराधनं जीवस्य परमो धर्म: । अतएव जीवकृते धर्मजिज्ञासातिरिक्तेन ब्रह्मजीज्ञासा उपदिष्टा भवति । जीव: एतस्मात् कारणात् चञ्चल: अस्थिरो वा भवति । जीव: यदा अन्येषाम् स्थितिं ज्ञातुं प्रभवति स्वयमपि किं तावत् कर्त्तव्यं किं वा न कर्त्तव्यं इति विषये सचेतन: भवेत् । जीवकृते निमित्तोपादान-कारणरूपेण परब्रह्म विराजते । तेनैव अभिप्रेरित: सन् जीव: पुन: तस्मिन् निमीलति । व्यक्तिदृष्ट्या जीवोऽयम् अपरस्य भावनिमज्जनेन स्वकीयां सत्तामुत्पादयति । जीव: कथं भगवत्सत्ताधारी सन् स्वात्मानं अत्रैव मनुते तत्र तस्य मिथ्यापवाद: इति परिशील्यते । सत्तापरिकल्पनां विना केवलं ईश्वरार्पणबुद्ध्या जीव: सर्वं कर्त्तुं प्रवृत्तो भवेत् चेत् तत्रैव सहावस्थानं संघटितं भवति । वैदिकयुगात् आरभ्य अधुनातनकालेऽपि जीवस्य एतादृशी अवस्था वरीवर्त्ति एव ।

जीव: यद्यपि केवलाद्वैतदृष्ट्या अपरै: दार्शनिकै: विचार्यते तथापि ब्रह्मण:

चिदंशः जीवः नामरूपादिविशिष्टः सन् जगत्यस्मिन् विराजते । तत्र न केवलं जीवस्य अपि च ब्रह्मणः परब्रह्मायत्तत्वमाद्रियते । जीवः स्वभावतः विकारमयः इति हेतोः जीवस्य परब्रह्मायत्तस्थितिप्रवृत्तिहेतोः तदनुसारिणी तत्र वृत्तिः भवति। केवलं जीवः पूर्वजन्मकर्मफलं एव तत्र मार्गप्रदर्शनकारि । अतएव जीवधर्म भवति स्वयं सः कदाचित् अपि स्वतन्त्रतया न स्वीकर्त्तव्यः अथवा परब्रह्मभावनया सर्वदा एव स्थातव्यम् । अतएव श्रूयते ''समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः'' (मुण्डकोपनिषत् ३/१/२) इति । एतत् अभिलक्ष्य कृष्णयजुर्वेदीय-श्वेताश्वतरोपनिषदि श्रूयते यथा – ''भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधब्रह्ममेतत्'' इति । यदि जीवः 'तत्त्वमसीति'भावनया, 'सर्वं खल्विदं ब्रह्म' इति भावनया 'अहं ब्रह्माऽस्मि' इति वा भावनया उल्लसितः सन् यथावश्यककर्मं सम्पादयति तदा तस्यैव कर्मजातं सफलं भवति । अयमेव जीवस्य परमो धर्मः भवति । मूलतः परब्रह्मणः दर्शनमेव जीवस्य परमो धर्मरूपेण स्वीक्रियते । कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि श्रूयते यत् पिता वरुणः पुत्राय भृगवे ब्रह्मसम्बन्धियत् ज्ञानं कथयति यत् ''सत्यं ज्ञानम् अनन्तं ब्रह्म'' इति एतया श्रुत्या ब्रह्मणः सत्यत्वं ज्ञानत्वं अनन्तत्वञ्च जीवेन एव ज्ञातव्यमिति जीवस्य परमो धर्मः । किन्तु एतत् ज्ञानाय वारम्बारं तपः एव आचरणीयम् । तपसा हतकिल्विषः स जीवः परब्रह्मपरायणः सन् तादात्म्यभावसम्पन्नः भवेत् । अयमेव जीवस्य परमो धर्मः । वरुणः भृगवे उपदिशन् कथयति – '' यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्ति अभिसंविसन्ति''। तद्विजिज्ञासस्व । तद् ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ।। (कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि (३/१) इति, अथच ''आनन्दाध्येव खलु इमानि भूतानि जायन्ते, आनन्देन एव तिष्ठन्ति'' इति अनया श्रुत्या निरन्तरमानन्दानुभवः एव जीवधर्मो भवति । जीवः निरानन्दो भवेत् चेत् तस्य सकला क्रिया निष्फला भवति । जीवः कथम् आनन्दान्वितः भवेत् तदर्थं ऋषिदृष्टं वचनं श्रूयते कृष्णयजुर्वेदीयतैत्तिरीयश्रुतौ (२/७) यथा – ''रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति'' इति । अतएव जीवकृते रसास्वादनं एव परमो धर्मः । प्रवृत्त्यात्मकः निवृत्त्यात्मको वा धर्मः भवतु नाम जीवकृते

सर्वमेतत् स्वीकर्त्तव्यं यत् निरन्तरं सत्यपरायणता, ज्ञानपरायणता, अनन्तपरायणता, आनन्दपरायणता चेति परमो धर्मरूपेण स्वीक्रियते ।

अयं जीव: भोक्तृपुरुष: । पुरुषत्रितये अयं कूटस्थ: अक्षरपुरुष इति नाम्ना अभिहित: । हृद्देशे विराजमानोऽयं जीव: ज्ञानस्वरूप: ज्ञातृत्ववान्च भवति । पूर्ववर्तिजन्मसु अर्जितपुण्यपापफलोपभोगनिमित्तं तस्य इह जन्मनि शरीरधारणं सम्भवम् । मूलत: स: बद्धपुरुष: । परब्रह्मणा स: तस्य अवस्थानं यदि वा भवति तथापि तस्य फलोपभोक्तृत्वकारणात् परब्रह्मण: भिन्नत्वमेव श्रूयते । एतद्यथा ऋग्वेदसंहितायां अथर्ववेदीय मुण्डकोपनिषदि च यथा –

''द्वा सुपर्णा सयुजासखाया समानं वृक्षं परिषस्वजाते ।

तयोरन्य: पिप्पलं स्वाद्वत्यनशन्नन्यो अभिचाकशीति ।।'' इति ।

(ऋ.वे. १/१६४/२०)

एतेन एकस्मिन् वृक्षे एकत्र सहावस्थानं कुर्वतो द्वयो: पक्षिणोर्मध्ये जीवात्मन: फलोपभोक्तृत्वकारणात् एव बन्धनं येन तद् धर्मसिद्धि: । जीव: धर्मसम्पादनार्थं कथं पूर्वजन्मार्जितपुण्यपापप्रभावान्वितो भवति तद्विषये महर्षिणा बादरायणेन वेदान्तदर्शने सूत्रितं यथा – ''तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्त: प्रश्ननिरूपणाभ्याम्''(ब्रह्मसूत्रम् ३/१/१) इति ।

जीवस्य परमधर्मरूपेण ईश्वरप्राप्ति: अपेक्षते । ईश्वरप्राप्तिनिमित्तं साधनानि पञ्च भवन्ति । तानि यथा – कर्म-ज्ञान-भक्ति-प्रपत्ति-गुर्वाज्ञानुवृत्तिश्चेति । कर्मवृत्ति: सदाचारमाध्यमेन प्रकाश्यते । तत्र ''यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । तेह नाकं महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा:'' (शु.य.काण्व. ३५/१६) इति शुक्लयजुर्वेदश्रुत्या सत्वप्रधान: यज्ञ एव परमं कर्म । ''यज्ञो वै ब्रह्म'', ''यज्ञो वै विष्णु:'' इति वचनानुसारं यज्ञ: ब्रह्मस्वरूप: । यदुक्तं –

अग्निवायुरविभ्यस्तु त्रयं ब्रह्मसनातनम् ।

दुदोह यज्ञसिध्यर्थमृग्यजु:सामलक्षणम् ।।

(मनुस्मृति: १/२३)

''एषो वै प्रत्यक्षं यज्ञः यत् प्रजापतिः'' इति ब्राह्मणवचनेनापि स्पष्टं भवति । एतदभिलक्ष्य शुक्लयजुर्वेदीयशतपथब्राह्मणे ''यज्ञो वै श्रेष्ठतमं कर्म'' इति उपदिष्टम् । एतत् कर्म यथा गृहस्थानां तथैव अन्येषामाश्रमिणां कृते एव परमधर्मरूपेण निरूपितम् । एतेन धर्मेण सृष्टिचक्रं निरवच्छिन्नभावेन सञ्जायते । यदुक्तम् –

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।। इति ।

(मनुस्मृतिः ३/७६)

गुरोः उपदेशानुसारं – ''प्रजातन्तुं मा व्यवच्छेत्सीः'' इति तैत्तिरीयश्रुतिधिया जीवधर्मोऽयं कार्यान्वयित्वं गच्छति । एतेन साकं उपकर्मरूपेण आन्तारविशिष्टानि अन्यानि कर्माणि निरूप्यन्ते धर्मशास्त्रदृष्ट्या दर्शनशास्त्रदृष्ट्या च तानि परमात्मपरकाणि भवन्ति । तत्र दहरपञ्चाग्निविद्या या खलु छान्दोग्यब्राह्मणे श्रूयते, नासदीयविद्या या खलु ऋग्वेदसंहितायां श्रूयते तदनुष्ठानपरायणता एव जीवधर्मो भवति । कर्मणा साकं ज्ञानमिश्रणं जीवधर्मो भवति । ''नहि ज्ञानेन सदृशं पवित्रमिह विद्यते'' इति भगवद्गीतोक्तेः जीवकृते ज्ञानार्जनं अर्थात् परमेश्वरसम्बन्धियद् ज्ञानाहरणं एव परमो धर्म भवति । एतदुद्दिश्य शुक्लयजुर्वेदसंहितायां ईशावास्योपनिषदि (४०/११) वा श्रूयते –

विद्यां चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।। इति ।।

अत्र विद्या ज्ञानसाधनत्वेन स्वीक्रियते । शाश्वतं ज्ञानं तु परब्रह्म एव । तेनैव साकं सम्पृक्तिः जीवस्य परमो धर्मः । ''अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः'' इति भगवद्गीतोक्तेः जीवस्य ज्ञानं एव सततं अज्ञानावृतं भवति । जीवः एतद् ज्ञात्वा ततः मुक्तिप्राप्त्यर्थं अहरहशास्त्राध्ययनं कुर्य्यात् । अहरहशास्त्राध्ययनेन जीवस्य ज्ञानं निर्मलं भवति । अतएव शतपथब्राह्मणे श्रूयते – ''स्वाध्यायोऽध्येतव्यः'' इति । उत्पत्तिः, आप्तिः, विकृतिः, संस्कृतिश्चेत्यादयः ये खलु चत्वारः संस्काराः भवन्ति ते सर्वे अध्ययनसम्बलिताः भवन्ति ।

अयमेव जीवधर्मः इति निश्चप्रचम् ।

जीवधर्मरूपेण भक्तिरपि अङ्गीक्रियते । इयं च भक्तिः भगवति पुरुषोत्तमे एव कर्त्तव्या । जीवस्य अयमेव परमो धर्मः । श्रीमद्भागवते प्रथमस्कन्धे (१/२/६) भगवता व्यासदेवेन उपदिष्टा यथा –

स वै पुंसा परो धर्मो यतो भक्तिरधोक्षजे ।

अहैतुक्यप्रतिहता ययात्मा सम्प्रसीदति ।। इति ।

भगवान् श्री नारदः सा परानुरक्तिरीश्वरे इति कथयन् परमेश्वरे अनुराग एव जीवस्य परमो धर्म इति उपदिशति । एषा भक्तिः पराभक्तिः अपराभक्तिश्चेति द्विविधाः । पराभक्ति प्रेमरूपा एव । अपराभक्ति साधनरूपिका । साधनरूपिका भक्ति वैधिरागानुगा चेति द्विविधाः । वैधिभक्ति नवधा भक्ति भवति । तदुक्तं प्रह्लादस्तुतौ श्रीमद्भागवते (७/५/२३-२४) यथा –

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।

अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।

इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।

क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ।। इति ।।

भगवतः नामसंकीर्त्तनेन तत्पादपद्मे भक्तिभावलाभ एव जीवस्य परमधर्मः भवति । तदुक्तं श्रीमद्भागवते (६/२/२२) –

एतावानेव लोकेऽस्मिन् पुंसा धर्मः परः स्मृतः ।

भक्तियोगो भगवति तन्नामग्रहणादिभिः ।। इति ।

रागानुगाभक्तेः चतुषष्टिः अङ्गानि उपदिष्टानि । मूलतः एतद् ज्ञातव्यं यत् साधनरूपिकया भक्त्या जीवः पराभक्तिं लभते । पराभक्तिसोपाने अवस्थानं एव जीवस्य परमो धर्मः । किन्तु तस्मिन् सोपाने अवस्थानार्थं जीवस्य सामर्थ्यं सर्वदा न भवति यदि भगवत्कृपा भवेत् तर्हि एतद् साधयितुं शक्यते । एतद् उद्देश्येन श्रीमद्भागवते प्रोक्तम् –(१/२/७)

वासुदेवे भगवती भक्तियोग: प्रयोजित: ।

जनयत्यासु वैराग्यं ज्ञानं यत्तदहैतुकम् ।। इति ।

अपरा भक्त्या परम्परया पराभक्तिलाभ: भवति । अपरा भक्ति साधनं भवतु पराभक्ते: साधनं वा भवतु अयमेव जीवस्य परमो धर्म: यत् सदा जीवने भक्ति: करणीया इति । ब्रह्मसूत्रकार: महर्षिवेदव्यास: परब्रह्मण: अव्यक्ततां प्रतिपाद्य तस्य प्रकाशनाय भक्तिरेव अपेक्षते, जीवेन अतएव भक्तिरेव आचरणीया इति उपदिशति । तत्र ब्रह्मसूत्रवचनद्वयं (३/२/२३,२४) यथा – ''तदव्यक्तमाहहि'' ''अपिचसंराधने प्रत्यक्षानुमानाभ्याम्'' इति । जीवधर्मरूपेण भक्तिरेव परमसाधनं भवति इति उपदिशता व्यासदेवेन श्रीमद्भागवते उक्तं ''यथा भक्त्या विरक्त्यादि .....'' इति । भक्तिलाभार्थं परमात्मन: कृपा अपेक्षते । यदि जीवविशेष: दैन्यभावेन भगवन्तमाश्रयेत् तर्हि तस्मिन् भक्तिभावस्य उद्रेक: भवति । अतएव वेदान्तकामधेनु: दशश्लोक्यां भगवता श्रीनिम्बार्काचार्येण उपदिष्टं यथा –

''कृपास्य दैन्यादि युजि प्रजायते यया भवेत् प्रेमविशेषलक्षणा । भक्तिर्ह्यनन्याधिपतेर्महात्मन: सा चोत्तमा साधनरूपिका परा'' । इति श्रुतिवाक्यात् अपि भक्ति: जीवधर्मरूपेण स्वीक्रियते । मरणकाले जीवं प्रचोदयति । शुक्लयजु:श्रुति: काण्व (४०/१५-१८) एतस्मात् एव कथयति यथा –

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।। १५ ।।

पूषन्नेक ऋषे यमसूर्यप्राजापत्यव्यूहरश्मीन्त्समूह

तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।

योऽसावसौ पुरुष: सोऽहमस्मि ।। १६ ।।

वायुरनिलममृतमथेदं भस्मान्त ँ शरीरम् ।

ॐ क्रतोस्मर कृत ँ स्मर क्रतो स्मर कृत ँ स्मर ।। १७ ।।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ।। १८ ।।

जीवधर्मरूपेण प्रपत्ति: अपि अङ्गीक्रियते । प्रपत्ति: शरणागति: । जीव: आत्मानं परब्रह्मण: अधीनं मन्यमान: परब्रह्मण: अधीनतां सर्वदा स्वीकुर्यात् । जीव: एतदर्थं स्तुतिं कुर्यात्, उपासनां च कुर्यात्, नमनं च कुर्यात् । एतदर्थं प्रतिक्षणं स: ईश्वरार्पणबुद्ध्या कर्म कुर्यात् । अयमेव जीवधर्मो भवति । श्रीमद् भगवद्गीतायां एतद् अभिलक्ष्य उच्यते यत् –

''ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।। (४/२४)

प्रपत्तिभाव: समनुष्ठित: भवेत् चेत् जीव: परमां गतिं लभते । शुक्लयजुर्वेदसंहिता जीवस्य प्रपत्तिभावद्योतनाय उपदिश्यति यथा –

ईशावास्यमिद ँ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृध: कस्य स्विद्धनम् ।।
कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ँ समा: ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।
(४०/१-२)

वस्तुगत्या जीव: शरणागत: सन् संसारसम्बन्धिकर्मजातमनुतिष्ठेच्चेत् सर्वं तत् नि:श्रेयसे कल्प्यते । जीव: प्रवृत्त्यात्मकरीत्या अपि यत् कर्म आचरति तत् अपि सफलतां गच्छति यदि तत् प्रपत्तिभावान्वितं भवेत् । अतएव जीवस्य परमधर्मो रूपेण प्रपत्ति: स्वीक्रियते विपश्चिद्भि: ।

गुर्वाज्ञानो वृत्तियोग: जीवधर्मरूपेण परां प्रसिद्धिं लभते । जीव: अल्पज्ञ:, अल्पशक्ति: मन्दमतिश्च । संसारतापक्लिष्ट: सन् स: तस्मादुधारप्राप्त्यर्थं व्याकुलित: भवति । तस्य व्याकुलताया: विनाशव्यवस्था अपि परब्रह्मणा कृतं वर्त्तते । यथा अक्षमसन्तानस्य पालनपोषणार्थं परब्रह्मणा पितृमात्रादि पुरुष: सृष्ट: तथैव अज्ञानात् संसारतापक्लिष्टस्य जीवस्य व्याकुलतानिवारणेन सह समुद्धरप्राप्त्यर्थं गुरु: परिकल्पित: महनीयता कारणात् गुरु: न केवलं ब्रह्मादिदेव:

अथच परब्रह्म भवति । यथा श्रूयते –

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।

गुरुः साक्षात्परंब्रह्म तस्मै श्रीगुरवे नमः ।।

संसारेऽस्मिन् सकलपीडाज्ञानं यदा जातं यदा च ततः उद्धारनिमित्तं व्याकुलता जायते तस्मिन् समये गुरुः एव अवलम्बनीयः भवति । विनम्रतापूर्वकं गुरुः एव अवलम्बनीयः । गुरुश्च श्रोत्रियः, ब्रह्मनिष्ठः, करुणामयः, भवितव्यः । एतदर्थं अथर्ववेदीयमुण्डकोपनिषदि (१/२/१२) श्रूयते यथा –

''परीक्ष्य लोकान् कर्मचितां ब्राह्मणो निर्वेदमायान् नास्त्यकृतः कृतेन । तद् विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।।'' इति । पुनश्च छान्दोग्यब्राह्मणे श्रूयते यत् -- ''एवमेवाहाचार्यवान्पुरुषो वेद'' इति । गुरोः ज्ञानवृत्तिः विलक्षणसम्पन्ना भवति । यतो हि गुरुः एव शिष्यंमन्तस्थं कृत्वा सर्वं ज्ञानं ग्राहयति । प्रसङ्गेऽस्मिन् श्रूयते –

''आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।

तं रात्रीस्तिस्र उदरे बिभर्त्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।। इति ।

(अथर्व. ११/५/३)

शिष्यः तथा विनीतः भवेत् येन गुरुः आनन्दितः स्यात् । गुरोः आनन्दभावात् शक्तिः सञ्जायते सा च शक्तिः शिष्याय उद्दिष्टा भवति । किन्तु गुर्वाज्ञानवृत्तिः शिष्य साधिता समुचिता न भवेत् चेत् गुरुः शक्तिविक्षेपं कुर्वन्नपि असफलः भवति । अतएव अस्मिन् प्रसङ्गे सद्गुरु सद्शिष्यश्च उभौ अपेक्षेते । गुर्वाज्ञानवृत्तियोगेन शिष्यस्य सकला जिज्ञासा समाहिता भवति । गुरुः करुणार्दहृदयेन शिष्यं यत् अनुशास्ति गुर्वाज्ञानोवृत्तियोगपरायणः शिष्यः तत् अधिगन्तुं समर्थो भवति । अतएव विनीतेन एव एतत् सर्वं आदृतव्यम् । अयमेव गुर्वाज्ञानवृत्तियोगः जीवस्य परमो धर्मो भवति ।

जीवः धर्ममनुतिष्ठेत् इति कथनेन लोक व्यवहारधर्मसम्पादने रतः भवेत् इति अर्थः जायते । किन्तु तुरीयपुरुषार्थमोक्षसाधने अयमेवधर्मः परम्परया

फलं ददाति न साक्षात् । अतएव ब्रह्मसम्बन्धि या जिज्ञासा अवश्यं कर्त्तव्या । जिज्ञासितं ब्रह्म जीवं तदात्मीयं एवं करोति । अतएव "वृणुते तेनलभ्यः" इति श्रुतिः वरीवर्त्ति । ब्रह्म एव बृहत्वात् भूमा इति प्रसिद्धम् । तदेव विजिज्ञासितव्यम् तदेवऽन्वेष्टव्यम् । तस्य ब्रह्मणः अन्वेषणमेव जीवस्य परमो धर्मः । एतदभिलक्ष्य शुक्लयजुर्वेदीयबृहदारण्यके (४/५) श्रूयते यथा – "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च" "आत्मानं एव प्रियमुपासीत' इति । आत्मज्ञानेन सर्वं जीवनं सफलं भवति । जीवस्य परिणति आत्मोपलब्धिरेव । यावत्पर्यन्तं आत्मोपलब्धिः न भवेत् तावत् पर्यन्तं जीवस्य मुक्तिः न भवेत् । अमुक्तः जीवः धूममार्गेण अहरह जननमरणमार्गेण वा वारम्बारं संसारं प्रतिपद्यते । एतदभिलक्ष्य भगवता मनुना उपदिष्टं यत् –

सम्यग् दर्शनसम्पन्नः कर्मभिर्न निबद्ध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ।। (म.स्मृ. अ.६/७४)

एतत् सर्वं गुर्वाज्ञानो वृत्तिसाधनेन सफलं भवति । अतएव अयं योगः जीवस्य परमो धर्मः ।

आत्मदर्शनं स्वयमपि जीवः अनन्तरं कुर्यात् । तद् दर्शनकाले संसारकर्मविरतिः स्यात्, भगवति ब्रह्मणि अनुरक्तिः स्यात् । तेनैवानुरागेण सः भगवन्निष्ठः स्यात् । भगवन्निष्ठः जीवः मुक्तिं लभते । एतदभिलक्ष्य भगवता वादरायणेन ब्रह्मसूत्रे सूत्रितम् यथा – "तन्निष्ठस्य मोक्षोपदेशात्" इति । भगवान् याज्ञवल्क्यः प्रसङ्गेऽस्मिन् उपदिशति यथा –

इज्याचारदमाहिंसा दानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद् योगेनात्मदर्शनम् ।।

(या.स्मृ. अ.१/८)

महर्षिवादरायणः ब्रह्मसूत्रे एतदभिलक्ष्य सूत्रयति यथा – "यत्रैकाग्रतत्राविशेषात्"(४/१/११) इति । अयमेव जीवधर्मः गुर्वाज्ञानवृत्तियोगमूलकः भवति । मुख्यतः जीवः यस्मात् सच्चिदानन्दमयात्

प्राकट्यं प्राप्नोति तस्मिन्निमीलनार्थं तस्य जीवस्य ब्रह्मजिज्ञासात्मकः धर्मः अनुष्ठातव्यः । ब्रह्म एव सततं अनुशरणीयम् । अतएव भगवता वादरायणेन शारीरकमीमांसासूत्रे सूत्रितं यथा – ''अथातो ब्रह्मजिज्ञासा'' इति परिणामतः ब्रह्मजिज्ञासा ब्रह्मसमाधिश्चेत्यादि एव जीवस्य परमो धर्मो भवति । एतदालम्बनपरमित्यादि कठश्रुतेः ब्रह्मज्ञानं यत् खलु सततं आदर्तव्यं स्वीकर्त्तव्यं वा स एव जीवस्य परमो धर्मः ।

जीवधर्मेषु वैदिककर्म अन्तर्भुक्तम् । वैदिककर्मसु प्रातः कालात् आरभ्य शयनं यावत् जन्मप्रभृति मरणं यावत् सकलं कर्म अन्तर्भुक्तं भवति । एतत् प्रवृत्तं कर्म परम्परया मोक्षसाधकं भवति । जीवः अत्र यथा सम्पृक्तः भवेत् एतदर्थं श्रुतिः अनुशास्ति । कृष्णजयुर्वेदीयतैत्तिरीय-संहितायां श्रूयते – ''जायमानो ह वै ब्राह्मणः त्रिभिः ऋणैः ऋणवान् जायते, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः, स्वाध्यायेन ऋषिभ्यश्च । एष वा अनृणो यज्वा ब्रह्मचारी वाऽसीत्'' इत्यादि जीवः अधिकारी जायमानः यथावश्यकं कर्म कुर्यात् । अत एव स्मृतिशास्त्रे विशेषतः मनुस्मृतौ स्मर्यते यथा –

अधीत्य विधिवत् वेदान् पुत्रान्श्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ।। (६/३६) इति।

अतः जीवः प्रवृत्त्यात्मककर्मसम्पादयन् ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-सन्यासाश्रमादि उचितं धर्मं यथाकालं यथारीति च कुर्यात् । एतेषु कर्मसु प्रातःकाले प्रथमतः सन्ध्याकर्म विधीयते । तत्र सूर्यवन्दनमपेक्षते । सूर्य एव सर्वदा प्रार्थनीयः । तस्य दर्शनेन सुमङ्गलं लभ्यते । ऋग्वेदे श्रूयते यथा –

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ।।

(७/३२/२६)

सूर्यः जीवानां कृते अमूल्यसम्पत्तिदायकः भवति । जीवः तस्य सानिध्यलाभार्थं सततं स्तुतिं कुर्यात् । श्रूयते ऋग्वेदे एतद्यथा – (८/६७/५)

"जीवान्नो अभिधेतनाऽऽदित्यासः पुरा हथात् । कद्धस्थ हवनश्रुतः" ।

सूर्यदर्शनेन आयुर्वृद्धिर्भवति । तद्यथा श्रूयते ऋग्वेदे (१/११३/१६) –

उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।

आरैक्पन्थां यातवे सूर्यायागन्न यत्र प्रतिरन्त आयुः ।। इति ।

सूर्यवन्दनं,सन्ध्योपासनं प्रातःसवनं इत्यादिभिः परिचीयते । सूर्यवन्दनं सावित्रिमन्त्रद्वारा सम्पाद्यते । स एव मन्त्रविशेषः शुक्लयजुर्वेद–काण्वसंहितायाम् –

"ॐ भूर्भुवः स्वस्तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ।" (३/४३)

अयं मन्त्रविशेषः बारम्बारमभ्यासं कुर्वन् जीवः पापमुक्तो भवति इति मनुयाज्ञवल्क्यादीनां धर्मशास्त्रकाराणामनुशासनम् । एतेन मन्त्रेण साकं सूर्यार्घ्यदानं सुमहत् फलदायकं भवति इति हेतोः सूर्यवन्दनं जीवस्य परमो धर्मो भवति । सकलशक्तेः आधारभूतः अयं सूर्यः ब्रह्म एव श्रुतिषु प्रसिद्धम् । श्रूयते एतद्यथा (शु.य.का. ८/२४) –

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावा पृथिवी अन्तरिक्ष१ सूर्य आत्मा जगतस्तस्थुषश्च ।।

जीवः सूर्योपस्थापनेन संसारकर्म मङ्गलान्वितं करोति । तथा च श्रूयते स्मृतिशास्त्रे (मनुस्मृति १/२३) –

अग्निवायुरविभ्यस्तु त्रयं ब्रह्मसनातनम् ।

दुदोह यज्ञसिध्यर्थमृग्यजुःसामलक्षणम् ।।

जीवद्दशायां पुरुषविशेषस्य एतदेव कर्म धर्मरूपेण स्वीक्रियते । स एव जीवः पुरुषः दीर्घजीवनाय भगवन्तं सूर्यं स्तौति । श्रूयते तद्यथा (ऋ.वे.७/६६/१६) –

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।

पश्येम शरदः शतं जीवेम शरदः शतम् ।। इति ।

तथा च श्रूयते अथर्ववेदसंहितायाम् (३/११/४) –

शतं जीव शरदो वर्धमान: शतं हेमन्तान्छतमुवसन्तान् ।

शतं त इन्द्रो अग्नि: सविता बृहस्पति: शतायुषा हविषा हार्षमेनम् ।।

अयमेव जीव: धर्मस्वनुष्ठित: भवेत् चेत् तस्य निस्तारार्थम् अवश्यं सहायकं भवति । शुभकर्मसम्पादननिमित्तं जीवनमपेक्षते । जीवनं दीर्घकालिकं भवेत् चेत् शुभं कर्म बहु कर्त्तुं पार्यते । जीवनं दीर्घकालिकं यथा भवेत् तदर्थं प्रार्थ्यते जीवपुरुषेण । श्रूयते एतद्यथा ऋग्वेदे (१०/१३७/१) –

उतदेवा अवहितं देवा उन्न यथा पुन: ।

उतागश्चक्रुषं देवा देवा जीव यथा पुन: ।। इति ।

शुभकर्मसु अग्निहोत्रमन्यतमं भवति । अग्निहोत्रकर्मणा जीवनं दीर्घकालिकं भवेत् इति सूचयति ऋग्वेदीया श्रुति: उपदिशति (१/९४/४) यथा –

भरामेध्यं कृणवामा हवींषि ते चितयन्त: पर्वणापर्वणावयम् ।

जीवातवे प्रतरं साधयाधियोऽग्ने सख्ये मारिषामा वयं तव ।। इति ।

यतो हि यज्ञकर्मणा अवश्यं सुप्रभाव: भवति । तेन जीवनं महिमान्वितं भवति । अग्निदेवता जीवनं धन्यं करोतु इति भावनया जीव: यज्ञकर्मणि प्रार्थयते । श्रूयते एतद्यथा ऋग्वेदे (८/८/२३) –

त्रीणि पदान्यश्विनोरावि: सान्ति गुहापर: ।

कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ।। इति ।

तथा च तत्रैव – (१०/१८/४)

इमं जीवेभ्य: परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।

शतं जीवन्तु शरद: पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ।। इति ।

एतस्मात् कारणात् जीवनमपि यजनं कथ्यते । एतदेव यजनं जीवकर्तृकं भवति इति हेतो: जीवपुरुष: अपि यजमान: इति कथ्यते । श्रूयते एतद्यथा तत्रैव –

त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परिपासि विश्वत: ।

स्वादुक्षद्मा यो वसतौ स्योन कृज्जीवयाजं यजते सोपमादिव: ।।

(१/३१/१५)

श्रीमद्भगवद्गीतायामपि श्रीकृष्णेन उक्तं – यज्ञसम्पादनं सर्वेषां मानवानां कृते परमकर्त्तव्यामिति । यथा –

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।

यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।। (१८/५)

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।

कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ।। (१८/६) इति ।

न केवलं सूर्यः अपि च इन्द्रादयः देवाः अपि जीवेन प्रार्थनीयाः भवन्ति । तद्द्वारा जीवपुरुषस्य आयुवृद्धिर्भवति । श्रूयते एतद्यथा अथर्ववेदसंहितायाम् –(१९/७०/१)

"इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहम् ।

सर्वमायुर्जीव्यासम् ।।"

पुनश्च जीवस्य कल्याणार्थं इत्थमपि संसारागमननिवारणार्थं जीवपुरुषेण भगवान् रुद्रदेवः प्रार्थनीयः भवति । प्रसङ्गेऽस्मिन् शुक्लयजुर्वेदे काण्वसंहितायां (३/६८-६९) श्रूयते यथा (ऋ.वे. ७/५९/१२) –

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।।

त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।

उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ।। इति ।

जीवः स्वकल्याणबृद्ध्यर्थमपि भगवन्तं रुद्रदेवं स्तौति । तद्यथा ऋग्वेदे –

मानो वधीरुद्र मा परा दा माते भूम प्रसितौ हीलितस्य ।

आनो भज बर्हिषि जीवशंसे यूयं पातस्वस्तिभिः सदा नः ।। इति ।

(७/४६/४)

तथा च श्रूयते शुक्लयजुर्वेदकाण्वसंहितायाम् (१७/१६) –

मानस्तोके तनये मान आयुषि मानो गोषुमानो अश्वेषुरीरिषः ।

मा नो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।। इति।

जीवः ब्रह्मणः चिदंशः । यथा ब्रह्म नितरां कल्याणमयं तथैव आचरितं जीवने प्रयतितव्यम् । जीवः केवलं ब्रह्मोपासनया एतस्मिन् प्रवृत्तिमार्गे गन्तुं पारयति । अज्ञानविनाशेन एतन्मार्गगमनं सुकरं भवति । यावत् पर्यन्तमज्ञानं स्यात् तावत् पर्यन्तं सन्मार्गस्य प्राप्तिः न स्यात् । अतएव भगवान् श्रीनिम्बार्काचार्यः यत् उपदिशति यत् वा अपरैः आचार्यैः व्याख्यातं तत् वेदान्तकामधेनुदशश्लोकीवचनं (श्लोक ६) यथा –

"उपासनीयं नितरां जनैः सदा प्रहाणयेऽज्ञानतमोऽनुवृत्तेः" इति ।

तत्र विस्तृतविवेचनं तु आचार्यविश्वनाथस्वाई कृत वेदान्तकामधेनुदश्लोकी-तत्त्वसुधाख्याटिप्पण्यां विपश्चिद्भिः समवलोकनीयम् ।

जीवनं बहुविघ्नसम्बलितं भवति । श्रेयस्कामी विघ्नैः पुनः पुनरपि प्रतिहन्यमानः स्व कर्म न परित्यजेत् । अत एव तस्य जीवनं कथं निष्कण्टकं भवेत् तदर्थं प्रार्थना श्रूयते । तद्यथा ऋग्वेदे (१०/६०/८) –

यथा युगं वरत्रया नह्यन्ति धरुणायकम् ।

एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ।।

अपि च दीर्घायुः यथा स्यात् विविधकर्मसम्पादने, विविधफललाभे च तदर्थं श्रूयते अथर्ववेदसंहितायाम् (३/३१/८) –

आयुष्मतामायुष्कृतां प्राणेन जीव मा मृथाः ।

व्यूहं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ।।

जीवपुरुषः अस्मिन् संसारे यथा कर्म आचरति तथैव परवर्तिनि काले फलं उपभुङ्क्ते । साधुकर्माचरणकारी साधु भवति । असाधुश्च तदनुसारेण असाधु भवति । शुक्लयजुर्वेदीय बृहदारण्यके अस्मिन् प्रसङ्गे श्रूयते यथा –

"साधुकारी साधुर्भवति । पापकारी पापी भवति" इत्यादि ।

तत्र सर्वत्र मनसः सम्पृक्तिकारणात् मनसः संयमनियता अपेक्षते । मनसः संयमनियता साधने अपरेषां इन्द्रियाणां तदनुवर्त्तीत्वमपेक्ष्यते । कामः संकल्पो विचिकित्साप्रभृतीनि सर्वाणि मनसो लिङ्गानि भवन्ति । एतद् उद्दिश्य विष्णुपुराणे प्रोक्तम् –

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासङ्गि मुक्तौ निर्विषयं मनः ।। इति ।

मनः संयमनार्थं चक्षुः श्रोत्रप्रभृतीनां इन्द्रियाणां साध्वनुवर्त्तित्वं प्रयुज्यते । अतएव श्रूयते (काण्व. २७/२५) –

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा ꣳस सस्तनूभिर्व्यशेम देवहितं यदायुः ।।

परिवेशप्रभावानुसारं मनः सन्मार्गे प्रवर्त्तते । मनसः इयं दशा नितरां साध्वी भवतु एतदर्थं ऋग्वेदे यजुर्वेदे च श्रूयते यथा (काण्व.२७/१८-१९) –

आनो भद्राः क्रतवोयन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ।।
देवानां भद्रा सुमतिर्ऋजूयतां देवाना ꣳस रातिरभिनो निवर्त्तताम् ।
देवाना ꣳस सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।।

४. जीवागतिः –

ब्रह्मणः विस्फुलिङ्गा एव जीवाः भवन्ति । शुक्लयजुर्वेदीय बृहदारण्यके अन्यत्र च श्रुतिसाहित्ये जीवस्य उद्भवसन्दर्भे चर्चा विहिता । प्रसङ्गेऽस्मिन् श्रूयते ऋग्वेदसंहितायां (१/१६४/३० तथा अथर्ववेदसंहितायां (९/१५/८) यथा –

अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।। इति ।

निमित्तोपादानकारणभूतेन ब्रह्मणा जीवा: सृष्टा: । तासु सृष्टासु प्रजासु तदेव ब्रह्म प्रविशति । ब्रह्मण: इदं कर्म मूर्त्ति ग्रहणाय एव उद्दिष्टम् । तत्र मूर्त्तौ वर्त्तमान: अयं आत्मा पदवाच्य: जीवात्मा भवति । जीवस्य अयं प्रकाश: साधारणत: पितृमातृनिमित्तक: इति ज्ञापनार्थं एवं च निर्द्दिष्टकालाभ्यन्तरे तस्य कुक्षिप्रवेशज्ञापनार्थं आश्वलायनश्रौतसूत्रम् सूचयति यथा –

दश मासाञ्छशयान: कुमारो अधि मातरि ।

निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि ।। इति ।

(आ.श्रौ.सू. ४/१४ ऋ.वे. ५/७८/९)

जीवात्मन: मूर्त्ति: इदं शरीरमिति कथ्यते । योनिकोटि सहस्रेषु जीवात्मन: सृतिकारणजनितं इदं शरीरं भोगाधिष्ठानं भवति । तत्र जीवनं मङ्गलमयं भवेत् इत्यर्थं श्रूयते । ऋग्वेदे (१०/४०/१०) यथा –

जीवं रूदन्ति विमयन्ते अध्वरे दीर्घामनुप्रसितिं दीधियुर्नर: ।

वामं पितृभ्यो य इदं समेरिरे मय: पतिभ्यो जनय: परिष्वजे ।। इति ।

शरीरं विनाशशीलम् । किन्तु जीव: नित्य: अविनाशी । श्रूयते एतद्यथा – ऋग्वेदसंहितायाम् (१०/१८/३) –

इमे जीवा विमृतैराववृत्रन्नभूद्भद्रादेवहूतिर्नोऽ अद्य ।

प्राञ्चो अगाम नृतये हसाय द्राघीय आयु: प्रतरं दधाना: ।। इति ।

तथा च कृष्णयजुर्वेदीय कठोपनिषदि – ‘‘न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।। (२/१८) । ‘‘अजो नित्य: शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।’’ इति । सामवेद-तलवकारशाखीय छान्दोग्योपनिषदि (६/११/३) आरुणिश्वेतकेतुसम्बादे, इन्द्रप्रजापतिसम्बादे (८/१२/१) च श्रूयते यथा – ‘‘भगवन् मर्त्यं वा इदं शरीरं आत्तं मृत्युना तदेवास्य भोगाधिष्ठानम्’’ इति । जीव: शरीरमभिसम्पद्य सुखं दु:खं च अनुभवति इति ऋग्वेदीयकौषितकीब्राह्मणे (३/६) इन्द्र प्रतर्दनसम्बादे श्रूयते । भगवता मनुना अपि स्मर्यते (१२/१३) यथा –

जीवसंज्ञोऽन्तरात्मान्य: सहज: सर्वदेहिनाम् ।

येन वेदयते सर्वं सुखं दु:खं च जन्मसु । इति ।

प्रकृतोऽयं पुरुषो देहेन्द्रियसंघातरूपशरीरं सम्प्राप्य धर्माधर्मरूपकार्यै: संयुज्यते । श्रूयते ऋग्वेदसंहितायाम् (१०/३६/९) –

सनेम तत्सु सनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागस: ।

ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ।। इति ।

तथा च शुक्लयजुर्वेदीयमाध्यन्दिन–वाजसनेयिशाखीयबृहदारण्यकोपनिषदि मुनिकाण्डे (४/३/८) ज्योतिर्ब्राह्मणे श्रूयते । तद्यथा – ''स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः सꣳसृज्यतेस उत्क्रामन् म्रियमाणः पाप्मनो विजहाति'' इति

जीव: प्रारब्धकर्मानुसारं यावत् अस्मिन् शरीरे स्थितिनिमित्तं कर्म विद्यते तावत् पर्यन्तं तिष्ठति इति तथैव खिलकाण्डे (६/२/१३) प्राणसम्वादब्राह्मणे श्रूयते। तद् वचनं यथा – योषा वा अग्निगौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरचिर्यदन्तः करोति तेऽङ्गरा अभिनन्दा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वतितस्या आहुत्यै पुरुषः सम्भवति स जीवति यावज्जीवत्यर्थ यदा म्रियते ।। इति ।।

महाभारते आश्रमवासिकपर्वणि (३४/८) तत्रैव च उपदिष्टम् । तद्यथा –

यावन्न क्षीयते कर्म तावत् तस्य स्वरूपता ।

क्षीणकर्मा नरो लोके रूपान्यत्वं नियच्छति ।। इति ।

जीवशरीरे साधारणत: कौमारं यौवनं वार्धक्यश्चेति क्रमश: अवस्थात्रयं सम्भवति । अनन्तरं शीर्णशरीरात् जीवात्मन: उत्क्रान्तिर्भवति । उत्क्रान्तिर्नाम देहात् जीवस्य अपसरणम् भवति । श्रीमद्भागवते तृतीयस्कन्धे (३१/४४) एतद् स्फुटीकृतम् । तद्यथा --

जीवो ह्यस्यानुगो देहो भूतेन्द्रियमनोमयः ।
तन्निरोधोऽस्य मरणमाविर्भावस्तु सम्भवः ।। इति ।

विशेष उत्क्रान्तिनिमित्तं कौमारं यौवनं जरारूपाणाम् अवस्थानामतिक्रमणं नापेक्षते ।अधर्मबुद्धिः अपि नितरां आयुषः क्षयकारणं भवति इति सर्वैः विपश्चिद्भिः ज्ञातम् । वेदशास्त्राणां यथाकालं यथा रीति च अनाभ्यासात्, सदाचारपरिवर्जनात्, यथासमयं समुचितकर्माचरणजनितालस्यात्, भक्षणीयवस्तुदोषात् च अधर्मोत्पत्तिर्भवति इति वैदिकैः आमन्यते । तस्मात् अनन्तरं अल्पकाले अपि शरीरात् जीवस्य उत्क्रान्तिर्भवति । धर्मशास्त्रकारेण मनुना (४/५) उपदिष्टमेतत् तद्यथा –

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं, प्रमृतं कर्षणं स्मृतम् ।। इति ।

वैदिकवाङ्मये प्रतिपादितेषु विषयेषु उत्क्रान्तिः इति विषयः अन्यतमः । विशेषतः पुराणसाहित्ये अर्थात् मार्कण्डेयपुराणे दशमाध्याये पक्षि–तत्पुत्रसम्बादे जीवस्य एतद्दशा पक्षिपुत्रेण एव स्फुटीक्रियते । शरीरात् केन प्रकारेण जीवस्य उत्क्रामणं भवति तदत्र आलोच्यते । शरीराभ्यन्तरे वर्त्तमानं पित्तं प्रकुपितं भूत्वा इन्धनं विनापि तीव्रवायुसञ्चालनात् दीप्यमानं भवति, तथा च जीवस्य सर्वमर्मस्थानानि भिनत्ति । ततः उदाननामकः शरीरस्थः वायुः ऊर्ध्वमुखिभूत्वा जलीयसमस्तभूक्तपदार्थानां अधोगतिं निरुणद्धि । तदुक्तं मार्कण्डेयपुराणे (१०/४९,५०) पक्षिपुत्रमुखेन भगवता व्यासदेवेन –

ऊष्मा प्रकुपतिः कायः तीव्रवायुसमीरितः ।
भिनत्ति मर्मस्थानानि दीप्यमानो निरिन्धनः ।।
उदानो नाम पवनस्ततश्चोर्ध्वं प्रवर्त्तते ।
भुक्तानामम्बुभक्ष्याणामधोगतिरिरोधकृत् ।। इति ।

महाभारते आश्वमेधिकपर्वणि (१७/१५–१७) एतदनुरूपं शुद्धमहर्षिवचनम् उपदिश्यते । तद्यथा –

''ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ।
शरीरमनुपर्येत्य सर्वान् प्राणान् रुणद्धि वै ।।
अत्यर्थं बलवानूष्मा शरीरे परिकोपितः ।
भिनत्ति जीवस्थानानि मर्माणि विद्धि तत्त्वतः ।।
ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरात् ।
शरीरं त्यजते जन्तुश्छिद्यमानेषु मर्मसु ।।

यदा जरादिकारणात् पुरुषो मरणासन्नो भवति तदा अत्यन्तं निर्बलतां प्राप्य अचेतो भवति । तदा सः न परिचिनोति । तदा तस्य चित्तं उत्क्रामति । अतस्तदा स न शृणोति, न पश्यति, न वदति, न चिन्तयति । तदा मोक्षप्राणे सर्वेषां लयो भवति । मुमुर्षुः पुरुषो यदा अस्मात् शरीरात् उत्क्रामति तदा सर्वैः एतैः इन्द्रियै सह उत्क्रामति इति कौशितकी ब्राह्मणोपनिषदि (३/३-४) श्रूयते ।

प्रलयप्रसङ्गेन जीवस्य उत्क्रमणं भगवता मनुना (१/५५) अपि स्मर्यते । तद्यथा –

तमोऽयं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः ।
न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ।। इति ।

जीवनावसरे यः खलु पुरुषो मिथ्यासाक्ष्यवक्ता, मिथ्यावादी, वेदनिन्दकः, मिथ्यानुशासनकारी वा भवति तस्य अज्ञानतः मृत्युर्भवति । तस्य च मृत्युसमये पूतिगन्धमयाः कूटमुद्गरधृतहस्ताः अत्यन्तं भयङ्कराः यमदूताः तत् सम्मुखे उपस्थिताः भवन्ति । तदा तान् दृष्ट्वा स पुरुषः कम्पितशरीरेण भ्रातृ-मातृ-पुत्रादीन् आहूय निरन्तरं रोदनं करोति । तदा तस्य वचनं नावबोद्धुं शक्यते । तच्च वचनं नितरां एकवर्णमयं भवति । तस्य दृष्टिः घूर्णनशीला च भवति । तदानीं दीर्घश्वासकारणात् सम्पृक्तपुरुषस्य मुखं शुष्कं भवति । अनन्तरं स जीवः ऊर्ध्वश्वासग्रहणपूर्वकं दृष्टिभङ्गयुक्तः भूत्वा वेदनाग्रस्तो भवति । अथ च क्रमशः शरीरमिदं परित्यजति । तदुक्तं मार्कण्डेयपुराणे (१०/५९-६३) पक्षिपुत्रमुखेन व्यासदेवेन यथा –

कूटसाक्षी मृषावादी यश्चासदनुशास्ति वै ।
ते मोहमृत्यवः सर्वे तथाऽन्ये वेदनिन्दकाः ।।
विभीषणाः पूतिगन्धाः कूटमुद्गरपाणयः ।
आगच्छन्ति दुरात्मानो यमस्य पुरुषास्तदा ।।
प्राप्तेषु दृक्पथं तेषु जायते तस्य वेपथुः ।
क्रन्दत्यविरतं सोऽथ भ्रातृमातृसुतानथ ।।
साऽस्य वागस्फुटा तात ! एकवर्णा विभाव्यते ।
दृष्टिश्च भ्रामते त्रासाच्छ्वासाच्छुष्यत्यथाननम् ।।
ऊर्ध्वश्वासान्वितः सोऽथ दृष्टिभङ्गसमन्वितः ।
ततः सवेदनाविष्टस्तच्छरीरं विमुच्यते ।। इति ।

जीवनावसरे यो व्यक्ति अन्नजलादीनां दानं करोति सः मरणविपद्यपि प्रसन्नतामधिगच्छति । यः खलु पुरुषः श्रद्धापूतभावेन अन्नादिद्रव्याणां दानं करोति सः मरणकाले अन्नं विनापि तृप्तिं प्राप्नोति । येन पुरुषेण जीवनावसरे कदाचित् अपि असत्यं न उक्तं, स्नेहव्यवहारे भेदभावः न आचरितः, यश्च आस्तिकः श्रद्धावान् च भवति सः सुखपूर्वकं मरणं लभते । यः खलु देवब्राह्मणपूजारतः, ईर्ष्याशून्यः, कीर्त्तिमान्, दानशीलः, लज्जाशीलः भवति स पुरुषः मरणकाले मरणकष्टं न लभते । यः खलु कामवशात् उत्तेजनावसात् द्वेषकारणात् वा धर्मं न परित्यजेत् स यथाकारी, यथाचारी, सौम्यः भवति । स अपि यथाकालं सुखमृत्युं लभते । तृषार्त्तव्यक्तिविशेषाय यः सुपानार्थं जलादि न ददाति, ग्रीष्मे क्षुधायां च यः अन्नदानं व्यक्तिविशेषाय न करोति सः मरणकाले अवश्यं क्षुधादिकष्टं अनुभवति । धनदानेन यः जीवनं निर्वाहयति सः मरणकाले शीतं नानुभवति । चन्दनदानकारी तापं जयति । यः खलु पुरुषः उद्वेगकारी न भवति सः कथञ्चिदपि प्राणनिष्क्रमणकष्टं नानुभवति । यः मोहज्ञानप्रदाता भवति सः मरणकाले महत् भयं प्राप्नोति । अधमः पुरुषः अत्यन्तं कठिनं भयं वेदनाञ्च प्राप्य मरणं लभते । सर्वमेतद् उपदिष्टं वैदिकवाङ्मये विशेषतः

मार्कण्डेयपुराणे पक्षि–पक्षिपुत्रसम्बादे (१०/५२–५८)। तद्यथा –

अन्नानि येन दत्तानि श्रद्धापूतेन चेतसा ।
सोऽपि तृप्तिमवाप्नोति विनाऽप्यन्नेन वै तदा ॥
येनानृतानि नोक्तानि प्रीतिभेदः कृतो न च ।
आस्तिकः श्रद्दधानश्च ससुखं मृत्युमृच्छति ॥
देवब्राह्मणपूजायां ये रता नोऽनसूयवः ।
शुक्ला वदान्या ह्रीमन्तस्ते नरा सुखमृत्यवः ॥
यो न कामान्न संरभान्न द्वेषाद्धर्मत्सृजेत् ।
यथोक्तकारी सौम्यश्च स सुखं मृत्युगच्छति ॥
अवारिदायिनो दाहं क्षुधाश्चानन्नदायिनः ।
प्राप्नुवन्ति नराः काले तस्मिन् मृत्यावुपस्थिते ॥
शीतं जयन्ति धनदास्तापं चन्दनदायिनः ।
प्राणघ्नीं वेदनां कष्टां ये चानुद्वेगकारिणः ॥
मोहज्ञानप्रदत्तारः प्राप्नुवन्ति महद्भयम् ।
वेदनाभिरुदग्राभिः प्रपीड्यन्तेऽधमा नराः ॥ इति ।

५. जीवगतिः –

उत्क्रमणमालोचितम् । अधुना जीवगतिः प्रस्तूयते । हृदयगतनाड्यः हि उत्क्रमणमार्गः भवति । शरीरेऽस्मिन् यः हृद्देशः, यत्र खलु जीवात्मा तिष्ठति तत्र एकशतं मूलभूता नाड्यः सन्ति । तद्यथा श्रूयते शुक्लयजुर्वेदे –

एतासां सर्वासां शाखाप्रशाखा नाड्यो द्वासप्ततिकोटिसंख्याका भवन्ति । तत्र सर्वत्र व्यानवायुश्चरति । द्वासप्ततिकोटिनाडीभ्यः भिन्ना अपरा एका नाडी वर्त्तते तस्याः नाम सुषुम्ना भवति । इयं नाडी हृद्देशादारभ्य मस्तिष्कस्य ऊर्ध्वभागपर्यन्तं निःसरति । अनया नाड्या उदानवायुः शरीरस्य ऊर्ध्वभागे सञ्चरति । यः खलु पुरुषः पुण्यशीलः तं अयं उदानवायुः अपरप्राणेन्द्रियसहितं

वर्त्तमानशरीरात् बहिष्कृत्य स्वर्गादि उच्चलोकाभिधेयं पुण्यलोकं नयति पापकर्मयुक्तं पुरुषं शूकरकुक्कुरादि पापयोनिं रौरवादिनरकं च नयति । अथ च य: खलु पुरुष: पापपुण्योभयरूपकर्मणां फलभोगार्थं अभिमुखी भवति तं मनुष्यलोकं प्रेरयति । तद्यथा श्रूयते कृष्णयजुर्वेदीय-कठोपनिषदि (२/३/१६)

''शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनि:सृतैका ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ।।''

तथा च तदेव श्रूयते सामवेदतलवकारशाखीयछान्दोग्योपनिषदि (८/६/६)

तथा च श्रूयते मैत्रायण्युपनिषदि (६/२१) –

तथा च श्रूयते अथर्ववेदीय-पिप्पलादशाखीय-प्रश्नोपनिषदि (३/७) –

''अथैकयोर्ध्व उदान: पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ।।''

उपनिषद् इदमपि प्रतिपादयन्ति यद् जीवो यथा जाग्रदवस्थात: पृथग्भूय स्वप्नापवस्थां प्रविशति तथैव जराजीर्णं स्थूलं शरीरं विहाय नूतनं शरीरमङ्गीकरोति । स्थूलशरीरस्य प्राचीनस्य परित्याग एव तस्य मरणं नूतनस्य शरीरस्य परिग्रह एव च तस्य जन्म इत्यभिधीयते । जीवो हि आमोक्षं विविधाभि: वासनाभि: अनुबद्धो भवति । वासनाप्रभावात् एव तस्य भविष्यतो जन्मन: स्वरूपं निर्णीयते । स्वात्मन: पूर्वार्जितप्रशस्ताप्रशस्तकर्मानुरूपे एव तस्य सुगतिर्दुर्गती भवत: । अपि च स्मर्यते भगवता वादरायणेन ब्रह्मसूत्रे (३/१/१) –

''तदन्तरप्रतिपत्तौ रंहति संपरिसक्त एव प्रश्न निरूपणाभ्याम्''। इति।

शरीरात् उत्क्रमणात् परम् अयं जीव: वाप्वग्रसारी सन् सूक्ष्मशरीरधारणं करोति । शरीरं पितृमातृनिमित्तकं भवति । तस्य विनाशानन्तरं जीव: तत् कर्मानुसारं गतिं लभते । सा च गतिस्त्रिविधा: । अर्चि-धूम-निम्नेत्याख्या । अर्चिगति: उत्तमा गतिर्यतस्तद्गतिपरायणस्य जीवस्य पुनर्जन्म न सम्भवति । धूमगति: मध्यमा गति: । तत: कालवशात् पुनर्जन्म न सम्भवति । तृतीया गतिर्निम्ना

भवति । तया प्रतिक्षणं जन्ममरणं सम्भवति । ये आस्तिकबुद्ध्या कर्म आचरन्ति ते अग्निरूपज्योतिरभिमानिदेवताद्युपलक्षितदेवयानमार्गे गच्छन्त्यन्तीति छान्दोग्योपनिषदि (५/१०/१-२) श्रूयते । अपि च श्रीमद्भगवद्गीतायाम् (८/२४) । तद्यथा –

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ।। इति ।

साधकाश्च मरणकाले सुस्थिरमनसा भक्तियुक्ताः सन्तः समाधिजसंस्कारेण च भ्रुवोर्मध्ये ऊर्ध्वगामिन्या नाड्या प्राणवायुं स्थापयित्वा परं ब्रह्मपदं गच्छन्ति इति तत्रैव उक्तम् (८/१०) –

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्यसम्यक् स तं परं पुरुषमुपैति दिव्यम् ।। इति ।

साधको जीवपुरुषः शरीरत्यागसमयं परमात्मनि लीनतां प्राप्तुं कातरप्रार्थनां करोति । मम इन्द्रियाणि प्राणवायुश्च विश्वव्यापिनि समष्टिवायौ लीना भवन्तु, नश्वरोऽयं मम कलेवरः अग्नौ भस्मीभूतो भवतु, हे सच्चिदानन्द यज्ञमय भगवन् ! मम पूर्वकृतं सुकृतं स्मर, मां मनसि स्थापय इति शुक्लयजुर्वेदस्य ईशावास्योपनिषदि (४०/१७) वचनं श्रूयते । वस्तुगत्या ये अकामा निष्कामा आप्तकामा भवन्ति । तेषां तत्त्वज्ञानिनां लिङ्गदेहरूपप्राणस्य उत्क्रमणं शरीरान्तरग्रहणनिमित्तं न भवति । सद्यो मुक्तिभाजां तेषां सम्यग्दर्शननिष्ठानां गतिरगतिर्वा नास्ति । ब्रह्मसंलीनप्राणास्ते क्रमेण ब्रह्माधिगच्छन्ति । यदुक्तं बृहदारण्यकोपनिषदि मुनिकाण्डे (४/४/६) –

"तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ।।"

यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते

यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा अम्बरस्य खं तेन ऊर्ध्वं आक्रमते, चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्वम् आक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन् वसति शाश्वतीः समाः । अतिक्रामति इति छान्दोग्योपनिषदि श्रूयते । तद्यथा (८/६/५) –

"यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वा मीयते स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलुलोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् ।।" इति ।।

ब्रह्मसूत्रे भगवता वादरायणेन एतत् स्फुटीकृतम् । अधुनातनकालेऽपि एषा उक्तिः प्रचलति यथा –

पुण्यस्य फलमिच्छन्ति पुण्यनेच्छन्ति मानवाः ।
पापस्यफलनेच्छन्ति पापं कुर्वन्ति मानवाः ।।

पराशरस्मृतौ पूर्वोक्त श्रुतिस्मृतिवचनाधारेण स्मर्यते यथा (३/३७) –

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्चरणे चाभिमुखे हतः ।। इति ।

जीवपुरुषः सर्वदा कामयमानः । कामनायाः पूर्त्तिनिमित्तं भवतु, फलोपभोग-निमित्तं वा भवतु तस्य आविर्भावः । यः खलु जीवः कामयमानः इष्टापूर्त्तादिकं कर्म आचरति सः धूमादि अभिमानिदेवलोकं पितृयानं मार्गे गच्छति । धूममार्गेणगतः सः कर्मक्षयानन्तरं पुनः तेन एव आवर्त्तते । सः क्रमशः आकाशं आकाशात् वायुं, वायोः धूमं, धूमात् अभ्रम्, अभ्रात् मेघरूपं प्राप्नोति । ततः क्रमशः स जीवः ब्रीहियवादिरूपेण अस्याः पृथिव्यामुत्पद्यते । एतत् अन्नं ये ये भक्षयन्ति तथा च ये ये वीर्यसेचनं कुर्वन्ति तद्रूपधारणं करोति जीवः । एतेषु जीवेषु ये खलु उत्तमाचरणशीलाः भवन्ति ते शीघ्रमेव ब्रह्मणादियोनिं लभन्ते । ये च अशुभाचरणशीलास्ते न्यूनं शूकरकुक्कुरादियोनिं लभन्ते इति छान्दोग्यब्राह्मणोपनिषदि (५/१०/३-७) –

"य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैतिमासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति ।। मासेभ्य: पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ।। तस्मिन्यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति ।। अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह ब्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेत: सिञ्चति तद्भूय एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वा ।।" इति ।

श्रूयते तथा च स्मर्यते भगवद्गीतायां (८/२५) यथा –

धूमो रात्रिस्तथा कृष्ण: षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते ।।

तथा च स्मर्यते महाभारते अनुशासनपर्वणि (१११/३५) –

जीव: कर्मसमायुक्त: शीघ्रं रेतस्त्वमागत: ।
स्त्रीणां पुष्पं समासाद्य सूते कालेन भारत ।। इति ।

कीटपिप्पलिकादियोनिप्राप्ति: तृतीया अर्थात् निम्नगति: भवति । ये अत्यन्तमशुभकर्माचरणशीला: ते खलु इमां गतिं लभन्ते । अस्या: गते: अपरं नाम जायस्व म्रियस्व गति:। तद्यथा श्रूयते छान्दोग्यब्राह्मणोपनिषदि (५/१०/८) –

"अथैतयो: पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते तस्माज्जुगुप्सेत तदेष श्लोक: ।।"

एतस्य गतित्रयस्य प्राप्तिविचार: श्रीमद्भागवतमहापुराणे (३/३२/२-७) अपि उपन्यस्त: । तद्यथा –

स चापि भगवद्धर्मात्काममूढः पराङ्मुखः ।
यजते क्रतुभिर्देवान् पितृंश्च श्रद्धयान्वितः ।।
तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान् ।
गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ।।
यदा चाहीन्द्रशय्यायां शेतेऽनन्तासनो हरिः ।
तदा लोकालयं यान्ति त एते गृहमेधिनाम् ।।
ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे ।
निःसङ्गान्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ।।
निवृत्तिधर्मनिरता निर्ममा निरहङ्कृताः ।
स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ।।
सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम् ।
परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ।। इति ।

जीवगतिविषये कठोपनिषदि (२/२/६-७) नचिकेतसे सम्बोध्य भगवान् यमराजः उपदिशति यथा –

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।
यथा च मरणं प्राप्य आत्मा भवति गौतम ।।
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ।। इति ।

देहान्तरप्राप्तिप्रसङ्गे भगवता मनुना अपि स्मर्यते । तद्यथा उक्तं मनुस्मृतौ –

यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च ।
समाविशति संसृष्टस्तदा मूर्त्तिं विमुञ्चति ।। (१/५६) इति ।

मध्यमनिम्नवर्गीयाणां जीवानां कर्मजनितयन्त्रणाभोगनिमित्तं पूर्वानुरूपवयोवस्थासंस्थानैः संयुक्तं तच्छरीरं भवति वायुर्यथा गन्धस्थानात्

गन्धं गृहीत्वा स्थानान्तरं गच्छति देहस्वामि जीवात्मा तथैव यच्छरीरं परित्यज्य गच्छति तस्मात् सेन्द्रियं मनः गृहीत्वा यच्छरीरं प्राप्नोति तत्र प्रविशति । श्रीमद् भगवद्गीतायां (१५/८) भगवता श्रीकृष्णेन उपदिष्टं एतद् यथा –

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।। इति ।

उत्क्रामणानन्तरं यमदूता जीवविशेषं दारुणपाशैर्वध्वा दण्डप्रहारेण सम्भ्रामयन्तो दक्षिणदिशि नयन्ति । तदुक्तं भगवता व्यासदेवेन मार्कण्डेयपुराणे यथा –

वाय्यग्रसारि तद्रूपं देहमन्यत्प्रपद्यते ।
तत्कर्मजं यातनार्थं न मातृपितृसम्भवम् ।।
तत्प्रमाणवयोवस्थासंस्थानैः प्राग्भवं यथा ।
ततो दूतो यमस्याशु पाशैर्वध्नाति दारुणैः ।।
दण्डप्रहारसंभ्रान्तं कर्षते दक्षिणां दिशम् ।। इति ।

(१०/६४-६५)

जीवगतिः असाधारणी भवति । शरीरात् जीवस्य उत्क्रमणं, शरीरे अवस्थानं चेत्यादि अज्ञानिभिः ज्ञातुं न शक्यते । तद्यथा उक्तं श्रीमद्भगवद्गीतायाम् –

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।। (१५/१०)

जीवगतिः वैदिकैः या निर्णीता तत् बुध्वा संसारेऽस्मिन् जीवः आवश्यकं कर्म जातमनुतिष्ठते चेत् नूनं सः शुभां गतिं लभते । विस्तृतविवेचनं तु आचार्य डा.विश्वनाथस्वाईं विरचितजीवगतिनिबन्धे समवलोकनीयम् ।

विद्वद्भिः एतद् ज्ञातव्यं यत् जन्मान्तरभावनायां इहजन्म संकल्पः मुख्यकारणं भवति । संकल्पः तत्र शुभाशुभकर्मसम्पादने अपि कारणं भवति स एव संकल्पः मनः प्रवृत्त्यनुकूलं परिलक्ष्यते । मनः परमेश्वरानुकूलं भवति चेत् कर्म अपि तदनुकूलं भवति । यद्यपि –

''संकल्पमूल: कामो वै यज्ञा: संकल्पसम्भवा: ।
व्रतानि यमधर्माश्च सर्वे संकल्पजा स्मृता: ॥''

(मनुस्मृति: २/३)

भगवता मनुना समुपदिष्टा: तथापि तदेव मन: शुभानुवर्ति भवेत् चेत् सर्वं सुस्थितमन्यथा न । अतएव श्रूयते शुक्लयजुर्वेदे (काण्व. ३३/१) –

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मन: शिवसंकल्पमस्तु ॥ इति ।

जीव: स्व जीवद्दशाया: अन्तिमे भागे तथा प्रयतेत येन तस्य गति: आगतिश्च सर्वं शुभमनोवृत्यनुसारि भवेत् । तत्र मन: अस्थिरमितिसर्वदा सर्वैश्च ज्ञातम् । मनस: अस्थिरतां सूचनाय ''चन्द्रमा मनसो जात:'' इति श्रुतिसु उपदिष्टम् । तत्र मन: स्थिरमेव कर्त्तव्यम्, अन्यथा तेन परब्रह्मसाधने काठिन्योपलब्धि: । मनस: स्थिरता रक्षा एवं च सुसङ्गतमनोभावेन सह परब्रह्मणि गमनार्थं मुण्डकश्रुति: उपदिशति यथा – (२/२/४)

''प्रणवो धनु: शरोहि आत्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥'' इति ।

६. जीवब्रह्मणो: भेदाभेद: –

बृहन्तो गुणा यस्मिन् तत् ब्रह्म । तस्यैव ब्रह्मण: भागद्वयं परम् अपरं चेति भेदेन । अपरंब्रह्म शाब्दब्रह्म, परंब्रह्म परमात्मा । परब्रह्म नित्यं अजं शाश्वतम् अचलं निराकारं निर्गुणम् । स एव परमेश्वर: गुणी सर्वविद्य: । तस्य महनीयता श्रूयते ऋग्वेदसंहितायां (१०/८१/१) यथा –

य इमा विश्वा भुवनानि जुह्व दृषिर्होतान्यसी दत्पितान: ।
स आशिषा द्रविणमिच्छमान: प्रथमच्छदवराँ आ विवेश ॥ इति ।

तदेव परब्रह्मसृष्टे: प्राक् अपि विराजितं भवति इति सूचयन्ति सा एव श्रुति: प्रतिपादयति ऋग्वेदे (१/१६४/४) यथा –

को ददर्श प्रथमं जायमानं मस्थन्वन्तं यदनस्था विभर्ति ।

भूम्या असुरसृगात्मा क्व स्वित्कोविद्वांसमुपगात् प्रष्टुमेतत् ।। इति ।

सृष्टे: प्राक् तदेव ब्रह्म एकमात्रमासीत् ''नान्यत् किञ्चन् मिषत्'' (२/४/१) इति सूचयन्ति तैत्तरीय आरण्यकश्रुति: प्रतिपादयति अस्मिन् प्रसङ्गे । अग्निवायुप्रभृतय: सर्वेषु भूतेषु प्रविश्य यथा स्वकीयं रूपं प्रकाशयित्वापि स्वयं मूलरूपत: तथैव ब्रह्म सर्वत्र विराजमानं प्रकाशमानं सत् अपि नित्यं भवति । तदेव प्रकाश्यते ऋग्वेदसंहितायाम् (१०/८१/३) –

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।

सं बाहुभ्यां धमति सं पतत्रै द्यावाभूमी जनयन्देव एक: ।। इति ।

अस्य मन्त्रस्य सायणाचार्यकृतभाष्ये सुस्पष्टं वर्त्तते । तद्यथा – अनया सर्वात्मकत्वेन कुलालावदिति लक्षणत्वादधिष्ठानाद्यभावेऽपि स्रष्टुं शक्नोतीत्याह विश्वतश्चक्षु सर्वतो व्याप्तचक्षु: । उत अपि विश्वतोमुख: । तथा विश्वतोबाहु: । उत अपि विश्वतस्पात् । स एवंविध: परमेश्वर: एवा: अस्मिंस्त्रैलोक्य-मुत्पादयतीत्यर्थ: । कथमिति उच्यते । बाहुभ्यां दिवं सं धमति । धमतिगतिकर्मा । सम्यक् प्रेरयति । तथा पतत्रै: गमनशीलै: पादै: पृथिवीं सं धमतीति । एवं द्यावा भूमी जनयन् दिवं च पृथिवीं चोत्पादयन् देव: द्योतमान: स्वयं प्रकाश: परमेश्वर: एक असहाय एव वर्त्तते । स एव परमेश्वर अज: नित्य: शाश्वत: अमरणशील: । श्रीमद्भगवद्गीतायां (२/२०) स्मर्यते यथा –

न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूय: ।

अजो नित्य: शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।। इति ।।

कठोपनिषदि अपि अयं मन्त्रभाग: श्रूयते । ब्रह्म नित्यमिति हेतो: तदंशभूत: जीव: अपि नित्य: । स अपि अज:, पुराण:, शाश्वत: । जीव: विस्फुलिङ्गो भवति इति हेतो: अल्पशक्तिसम्पन्न:, अल्पज्ञ:, भगवदायत्तस्थितिप्रवृत्तिक: भवति । परमस्तु निर्विकार: केवलं द्रष्टा एव । जीव: अवश्यं स्वार्जितकर्मफलं

उपभुंक्ते इति प्रदर्शयन्ति । ऋग्वेदश्रुतिः अर्थर्ववेदश्रुतिः अनुशास्ति यथा –

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति ।। इति ।

जीवः चलमानः फलभोक्तृकारणात् । परमस्तु अचलः । किन्तु विश्वव्यापकत्वात् परमात्मा अपि सचलः भवति । यद्यपि तस्य नियन्त्रणं सर्वदा वर्त्तते तथापि तस्य नियन्त्रणं कालविशेषे अनुभूयते कालविशेषे च न । ब्रह्मणः चलमानत्वे श्रौतप्रमाणं यथा (कण्व.४०/४) –

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।

तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।। इति ।

प्रतिपादनस्य अयमभिप्रायः यत् जीवः इत्थं शक्तिसम्पन्नः न भवति यथा सः ईश्वरमतिरिच्य प्रवर्त्तते । जीवः यद्यपि ईश्वरनिर्देशेन सर्वं करोति इति श्रुतिस्मृतिवाक्यानि प्राप्यन्ते तथापि जीवः तत्र कारणरूपेण अंशमात्रेण फलरूपं अंशं भुङ्क्ते । घटान्तरकारणात् जीवः संसरणशीलः भवति । ब्रह्म तु निराकारं, निरञ्जनं, निष्कलङ्कं इत्यादि भवति । बृहदारण्यकोपनिषदि (४/४/२) –

"जीवात्मनः प्रयाणस्य वर्णनप्रसङ्गे इदमुक्तम् यत् मरणोन्मुखो जीवः दौर्बल्यं संज्ञाशून्यत्वं च व्रजति । सर्वप्रथमं तस्य रूपावबोधशक्तिः शिथिली भवति । तदनन्तरम् अन्यान्यपि इन्द्रियाणि अन्तःकरणेन सह शैथिल्यम् अश्नुवन्ते । क्षीणेषु सर्वेन्द्रियसामर्थ्येषु हृदयस्य उपरितनोभागः प्रकाशते । इमं प्रकाशमाश्रित्यैव जीवः शरीरस्य विभिन्नेभ्यो रोमकूपेभ्यः बहिर्भूय स्वप्राक्तन कर्मानुसारेण विभिन्नानि नवनवानि आलम्बनानि गृह्णाति ।।" इति ।

अल्पशक्तिकारणात् जीवः प्रारब्धकर्मानुसारं भवतु सुखस्वाच्छन्द्यानुरूपं अकार्यमपि आचरति । तेन सः बद्ध भवति । किन्तु ब्रह्मणः कार्यं तु जगत् भवति इति हेतोः तस्य दोषशून्यता सततं वर्त्तते । अतएव श्रूयते छान्दोग्ये (८/१/५) –

"एष आत्मा अपहतपाप्मा विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपासः

सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति''।। इति ।।

जीवः अज्ञानवशवर्ती भूत्वा यत् किमपि आचरति तत्र राजसिक-तामसिकभावनया आचरितं कर्म अवश्यं तदनुरूपं फलं लभते । जीवकृते फलविनाशः कदापि न सम्भवति । तस्य भोग अस्मिन् जन्मनि न भवति परवर्त्तिनि जन्मनि अपि अनुभूयते । जीवः ब्रह्मणः आनन्दांशात् सम्भूतत्वात् निरन्तरं आनन्दमपेक्षते । किन्तु आनन्दः एव सत्वगुणधारी तत्र सम्पृक्ताः आनन्दमग्नाः भवेयुः इति बोधे जाते अपि मायाप्रपञ्चितभूत्वा सः आनन्दातिरिक्तं यत् फलं तत् प्राप्तुं प्रयतते । अत एव परमेश्वरविधाने यत् यत् निहितमस्ति तत् अधिगन्तुं जीवः व्याकुलितः भवति । जीवस्य इयं दशा ब्रह्मणः भिन्ना भवति । जीवस्य गतिः भुक्तिः मुक्तिः सर्वदा एव परतन्त्री भूता । जीवः यावत् इच्छति तावत् प्राप्तुं कदाचित् समर्थः भवति कदाचित् न । एतस्य कारणं भवति तस्य अज्ञानमेव । यद्यपि जीवः ज्ञानमयः इति केवलाद्वैतवादिभिः मन्यते यदि वा ज्ञातृत्ववान् इति ज्ञानाश्रयः इति न्यायवैशेषिकदर्शने स्वीक्रियते तथापि अयं जीवः ईश्वराधीनः इति सर्वैः स्वीक्रियते । परमात्माभिधेयः अयं ईश्वरः जीवमपि आत्मसात् करोति अन्तरङ्गतया अन्यथा ''यमेवैस वृणुते तेन लभ्यः'' इत्यादि श्रुतिषु उक्तम् । जीवस्य अपेक्षा वर्त्तते परब्रह्मणः सानिध्यलाभार्थम् । जीवकर्मणा ब्रह्म तु आकृष्टं भवति किन्तु मध्यवर्त्तिन्यां दशायां जीवः भोगाधिष्ठानान्तरं सम्प्राप्य पुनरपि भोगक्रियायां प्रवृत्तो भवति । भोग्यपदार्थानां भोगाय जीवः प्रवर्त्तते । परमात्माभिधेयब्रह्मपदार्थस्तु द्रष्ट्रूपेण नियन्तृरूपेण वा सततं वरीवर्ति । सर्वमेतत् वैदिकैः अनुभूतं यत् भोक्ता भवतु, भोग्यं भवतु, नियन्तृ वा भवतु सर्वं एतत् ब्रह्मस्वरूपम् । अतएव श्रूयते कृष्णयजुर्वेदीय श्वेताश्वतरोपनिषदि – ''भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्मएतत्''। प्रभेदमात्रं एतदेव परिलक्षणीयं यत् यदा ब्रह्मणः भोक्तृत्वं तदा ब्रह्मणः भोग्यत्वं नियन्त्रितत्वं च अवस्थाभेदेन अनुभूयते। सरस्वती रहस्योपनिषदि ब्रह्मणः स्वरूपविषये श्रूयते आत्मविद्या मया लब्धा ब्रह्मणैव सनातनी। ब्रह्मत्वं मे सदा नित्यं सच्चिदानन्दरूपतः।। इति ।। ब्रह्म निर्विकारम्।

ब्रह्मण: स्वरूपं प्रतिपादयन्ति शुक्लयजुर्वेदीय काण्वशाखाश्रुति: (४०/८) यथा –

''सपर्यगाच्छुक्रमकायमव्रणमस्नाविर१ँ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभू: स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्य: समाभ्य: ।।''

ब्रह्मण: एका प्रकृति: जीवभूता भवति । तदुपदिष्टं भगवता श्रीकृष्णेन भगवद्गतीयां (७/५) यथा –

अपरेऽयं इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ।। इति ।।

जीव: ब्रह्मण: नित्यमंशविशेष: । तस्य अंशिरूपिण: ब्रह्मण: प्रकाश: एव जीव भवति । सरस्वतीरहस्योपनिषदि जीव-जगत्-ब्रह्म-इत्येतेषां विचारप्रसङ्गे जीवब्रह्मणो: ऐक्यं प्रतिपाद्यते । तत्र श्रूयते यथा –

अस्ति भाति प्रियं रूपं नामचेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ।।

(सरस्वतीरहस्योपनिषद् मन्त्र ३२)

आद्यत्रये रूपे जगत: अन्तर्भाव: नास्ति किन्तु जीवस्य अन्तर्भाव: । अर्थात् यथा ब्रह्मण: सत्ता वर्त्तते, भानता वर्त्तते, प्रियत्वं वर्त्तते तथैव तदंशभूतस्य जीवस्य वर्त्तते । अतएव केवलाद्वैतभावनया जीवब्रह्मणो: भेद: नास्ति । तत् सम्प्रदाय प्रवर्त्तकै: श्रीशङ्कराचार्य भगवत्पादै: उपदिष्टं यथा –

श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभि: ।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर: ।।

द्वैताद्वैतनये जीवब्रह्मणो: यथाभिन्नता तथैव अभिन्नता वर्त्तते । जीवब्रह्मणो: अभिन्नता परिचायकविवरणं केवलाद्वैतभावनया सिद्धं भवति अर्थात् तत्र ब्रह्म यथा ज्ञानमयं जीव अपि तथैव ज्ञानमय: । केवलं इयान् विशेष: यत् ब्रह्म सम्पूर्णं ज्ञानं भवति जीवस्तु तदंशभूत: । अतएव अल्पज्ञ:, अल्पज्ञहेतो:

अल्पशक्तिः, अस्वतन्त्रः, भगवदायतस्थितिप्रवृत्तिकः । भगवन्तं अतिरिच्य तस्य स्थितिः कल्पयितुं न शक्यते । अयमेव भावः द्वैताद्वैतनये अपि स्वीक्रियते । अद्वैतनये जीवं स्वतन्त्रं न प्रतिपादयति इति हेतोः ब्रह्मणः सकासात् जीवस्य भिन्नता तदनुसारेण कल्पयितुं न शक्यते । तदनुसारेण जीवः कथञ्चित् अपि ज्ञानी न भवति । किन्तु द्वैताद्वैतनये जीवः ज्ञातृत्वधर्मवान् भवति । कर्तृत्वभोक्तृत्वस्थिति–प्रवृत्त्यादिविषयेषु सः अहं रूपज्ञाता भवति । न्यायवैशेषिकनयानुसारी अयमेव सिद्धान्तः अत्र द्वैताद्वैतदर्शने स्वीक्रियते । अतएव अत्र प्रसङ्गे उभयोः वेदान्तयोः अर्थात् केवलाद्वैत द्वैताद्वैतयोः मध्ये इदं पार्थक्यमाधारीकृत्य जीवः ब्रह्मणोः ज्ञातृत्वप्रसङ्गे भिन्नता लक्षीक्रियते । द्वैतद्वैतदर्शने जीवस्य ब्रह्मणः सकाशात् इयं भिन्नता या खलु अत्र सिद्धान्तिता इयमेव श्रुतिशास्त्रानुसारिणी । द्वैताद्वैतदर्शनप्रवर्त्तकाः आचार्याः निम्बार्कभगवत्पादाः जीवभेदं प्रदर्शयन्तः उपदिशन्ति यत् खलु वेदान्तकामधेनु–दशश्लोक्यां समुपदिष्टम् –

अनादि मायापरिवृत्तरूपं त्वेनं विदुर्वै भगवत् प्रसादात् ।

मुक्तं च भक्तं किलबद्धमुक्तं प्रभेदबाहूल्यमथापि बोध्यम् ।। इति ।

इमं प्रसङ्गमतिरिच्य ब्रह्मणः सकाशात् जगतः भिन्नाभिन्नत्वमपि तैः आचार्यैः समुपदिष्टम् । जगत्स्वरूपं प्रतिपादयन्तः अर्थात् अचित्स्वरूपं समुपदिशन्तः आचार्याः श्री निम्बार्काः कथयन्ति यत् –

"अप्राकृतं प्राकृतरूपकं च कालस्वरूपं तदचेतनं मतम् ।

मया प्रधानादि पद प्रवाच्यम्" इत्यादि ।

एतेन जगतः स्थितिसम्बन्धे सिद्धान्तः समुपलब्धः । न केवलं एतत् कथं वा विश्वऽस्मिन् विश्वे सकलं वस्तु ब्रह्म एव, ब्रह्माभिन्नं, ब्रह्मणः भिन्नं सर्वमेतद् बोधयितुं भगवद्भिः निम्बार्काचार्यैः उपदेशः कृतः । सोऽयं उपदेशः श्लोकाकारेण समुपन्यस्तः । तद्यथा –

सर्वं हि विज्ञानं अतो यथार्थकम् ।

श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः ।। इति ।

जीवब्रह्मणो: भेदाभेदं अपि दार्शनिका: प्रतिपादयन्ति । सम्प्रदायविशेषे अयमेव सिद्धान्त: किञ्चित् वैलक्षण्येन प्रतिपाद्यते किन्तु द्वैताद्वैतनयानुरूपविचार: कथञ्चित् अपि असंगत: नास्ति । वस्तुसत्ताया: स्वीकार: वस्तुसत्ताया: उद्भव: विकाश:, वस्तुसत्ताया: विलय: सर्वं खलु स्वीक्रियते चेत् विश्वमिदं ब्रह्ममयमिति प्रतिभाति । किन्तु ब्रह्ममयं सर्वं ब्रह्मण: अंशविशेष: इति स्वींकारे ब्रह्मण: परमशक्तिसम्बन्धे काचित् अपि आपत्ति न स्वीकर्त्तव्या । ब्रह्म, पराशक्ति:, वस्तुजातं जीव: वा सर्वमेतद् तच्छक्ते: अंशविशेष: । अत एव सर्वं खलु तन्मयं तदाकाराकारितं सुतरां यथार्थम् । इदं सर्वमभिलक्ष्य कृष्णयजुर्वेदीया श्वेताश्वतरश्रुति: उपदिशति यथा –

''परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञान बलक्रिया च'' ।

भगवतो ब्रह्मणो या अनन्ता अच्युता शक्ति: या खलु अन्तरङ्गा बहिरङ्गा तटस्थाश्चेति त्रिविधा तासां शक्तीनां पृथक् पृथक् भावेन स्वीकार: न भवेत् चेत् परब्रह्मण: विशेषमहनीयता कल्पयितुं न शक्यते । ब्रह्मण: निर्देशत्वं निर्गुणत्वेऽपि अशेषकल्याणगुणाधारकत्वं शङ्कर्षण-प्रद्युम्न-अनिरूद्धादि विह्वाङ्गित्वं सर्वेभ्य: परत्वं च सर्वं स्वरूपं श्रुतिषु उपदिष्टम् । जीवस्य तत: किञ्चित् भिन्नत्वं अर्थात् कर्मानुसारं अवस्थापन्नत्वं दोषयुक्तत्वं श्रूयते । जीवेन साकं जगत: अपि तथा दशा भवतिं । अनेन भावेन जीवब्रह्मणो: भेद: स्वीक्रियते ।

जीवब्रह्मणो: भेद: शास्त्रप्रमाणेन परिकल्पित:। जीव: सर्वदा ब्रह्मण: अंशविशेष: । तदुक्तं श्रीमद् भगवद्गीतायाम् (१५/७) –

ममैवांशो जीवलोके जीवभूत: सनातन: ।
मन: षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।। इति ।

जीव: दुष्परिणामाय न प्रकटीकृत: । किन्तु तस्य कर्मानुसारं विविधभावापत्ति: तस्य जीवद्दशायाम् – ''नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि'' इति वचनाधारेण एतद् एव ज्ञातं भवति यत् यस्मात् कालात् जीव: परब्रह्मण: नि:सृष्ट: तत: प्रभृति स्वप्रारब्धकर्मानुसारं स: विविधं भावं आपद्यते, यदा तस्य परब्रह्मज्ञानं

भवति तदा सः तस्याः दशायाः समुद्धारप्राप्त्यर्थं चेष्टते । कदाचित् पुण्यबलात् तस्य तस्मात् उद्धारः भवति, कदाचित् च तस्य प्रयत्नः निष्फलं भवति, कदाचित् च संयोगवशतः सः मुक्तः भवति इत्यादि। ब्रह्मणः सत्तां सम्प्राप्य सः असीमानन्दमनुभवति। अतएव अथर्ववेदीय मुण्डकोपनिषदि श्रूयते (२/२/८)

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।।"

जीवब्रह्मणोः भेदाभेदसम्बन्धे इयं चर्चा विहिता । प्रसङ्गेऽस्मिन् विस्तृतविवेचनं तु वेदान्तकामधेनुदशश्लोकीग्रन्थस्य आचार्यविश्वनाथस्वाईँकृत तत्त्वसुधाख्यटिप्पण्यां समवलोकनीयम् ।

जीवः ब्रह्मणः अंशः भूत्वापि ब्रह्मसमानः भवेत् । कथनस्य अभिप्रायः अयं यथा ब्रह्म सर्वतोभावेन सर्वेषां कृते कल्याणमयं तस्य क्रियश्च अक्रियश्च किञ्चित् नास्ति तथैव जीवः पुरुषः सर्वदा भवितव्यः । तस्य मनः सुष्ठु भवेत् येन तस्य स्थितिप्रवृत्त्यादि सकलं शोभनं भवेत् । अतएव शोभनमनोभावः जीवकृते अपेक्षते । जीवः ब्रह्मसमानः यथा भवेत् तदर्थं श्रूयते वाजसनेयसंहितायाम् (१९/४६) यथा –

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ।। इति

जीवात्मनामनेकत्वम्

परब्रह्मणः प्रकाशः जीवो भवति। आत्मनः प्रतिबिम्बश्च देही जीवः। यथा अग्नेः क्षुद्राः विस्फुलिङ्गाः प्रादुर्भवन्ति तथैव परमात्मनः सकाशात् जीव एव। प्रादुर्भाव इति कथनेन जीवसत्ता सर्वदैवास्तीति ज्ञायते। जीवानामनेकत्वं स्फुटिकुर्वद्भिः स्मृतिकारैः उपदिश्यते। तद्यथा उक्तं भगवता मनुना (१२/१५)—

असंख्या मूर्त्तयस्तस्य निष्पतन्ति शरीरतः।
उच्चावचानि भूतानि सततं चेष्टयन्ति याः।।

सुखदु:खेच्छाद्वेषप्रयत्ना जीवलिङ्गानि भवन्ति। एतानि एकस्मिन् एव समये सर्वेषु शरीरधारिषु न तावत्समानानि परिलक्ष्यन्ते। स्वभाववशात् एतेषु वैभिन्न्यं समुपपद्यते। अत: जीवात्मन: प्रतिदेहं भिन्ना अनेके च भवन्ति। वेदान्तशास्त्रे विशेषत: द्वैताद्वैतवेदान्ते भगवता श्री निम्बार्काचार्येण जीवानामनेकत्वमुपदिष्टम्। तत् तत्त्वं तदीय वेदान्तकामधेनु दशश्लोकी ग्रन्थे सन्निवेषितं वर्तते। "व्यवस्थातो नाना" (३/२/२०) इति न्यायवैशेषिकसूत्रप्रमाणत्वात् पुरुषबहुत्वं सिध्यति। तथा चोपदिष्टं भगवता कपिलेन सांख्यदर्शने (५/६१) यथा—

"नाद्वैतमात्मनो लिङ्गात् तद् भेदप्रतीते:" इति। पुनश्च सांख्यकारिकायाम् ईश्वरकृष्णेन प्रतिपादितम्। यथा—

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ इति। (सांख्यकारिका–१८)

जीवानां कायैशैल्या विभेदकारणात् अनेकत्वं सिद्धमिति आचार्य डी. विश्वनाथस्वाईमहोदयेन वेदान्तकामधेनुदशश्लोकी गन्थे विस्तरस: प्रतिपादितम्। श्रीमद्भागवते एतस्मिन् प्रसङ्गे वर्तते यथा—

रजोभि: समसंख्याता: पार्थिवैरिह जन्तव:।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादय:॥ (६/१४/३)

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति
नियमो ध्रुव नेतरथा।
अजनि च यन्मयं तदविमुच्य नियन्तु भवेत् सममनुजानतां
यदमतं मतदुष्टतया॥ (१०/८७/३०)

एतस्मिन् प्रसङ्गे छान्दोग्योपनिषदि (६/३/३) श्रूयते यथा—

'अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत्' इति।

जीव: परमपुरुषेत्याख्यस्य ब्रह्मण: अंशविशेष:। अत: सर्वे जीवात्मनो यथाकालमुपाधिरहिते परमात्मनि परब्रह्मण्येव निमीलन्ति। श्वेताश्वतरोपनिषद्यपि श्रूयते

यथा (६/१३) —

'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
तत् कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ इति

पुनश्च कठोपनिषदि (२/२/१३) श्रूयते यथा—

'नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वती नेतरेषाम्॥'

जीवः नित्यः इति कथनेन सत्व-रज-स्तमोगुणाश्रितः स अवश्यमेव भवतीति ज्ञायते। अन्यथा उपरोक्त कृष्णयजुर्वेदी श्रुतिवाक्यं निरर्थकं भविष्यति। ब्रह्मणः अंशविशेषः जीवः एव इति पुरुषसूक्तेऽपि (३५/५) श्रूयते—

'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि'। इति।

श्रीमद्भगवद् गीतायां श्रीकृष्णेनापि उक्तम् —'ममैवांशो जीवलोके जीवभूतः सनातनः' इति। जीवो नित्यचेतनः शरीरसंयोगवियोगयोग्यः, अणुपरिमाणः प्रतिदेहं भिन्नो ज्ञाता अनन्तश्चेत्याद्युपदिश्यते महर्षिणा वेदव्यासेन ब्रह्मसूत्रे (२/३/१६-४१) यथा—

'चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्' इति। जीवः स्वरूपतः अणुपरिणामविशिष्टं वर्तते न तु सर्वव्यापकम्। अपि च कर्म-कर्मफलविषयेऽपि स्वतन्त्र भोक्ता वर्तते न तु एकस्य जीवस्य कर्मफलम् अपरमाश्रयति। यदि जीवः सर्वव्यापकः भवेत् चेत् प्रत्येकस्य जीवस्य कर्मफलेन सह अन्येषां जीवानां सम्बन्धः अपि भवेत्। परन्तु तादृशः न भवति। अतः जीवः विभुः न अणुमात्रं वर्तते। 'अंशो ह्येष परस्यं' (२/३/४२) इति ब्रह्मसूत्रवचनानुसारं जीवस्तु परब्रह्मणः अंश-विशेषः वर्तते तत्तु निश्चितमेव। अतः मुण्डकश्रुतिरपि समर्थयति (३/१/९) यथा— 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश' इति।

वेदान्तशास्त्रे जीवस्य अनेकत्वार्थं केचन आचार्याः अवच्छेदकवादं प्रतिपादयन्ति। एतद् वादानुसारं यथा एकमेवाकाशं भिन्ने भिन्ने घटे प्रकोष्ठे वा दृश्यमानं

घटाकाशं-मठाकाशमिति संज्ञां लभते, तथैव एकमेव परमात्मा परब्रह्म भिन्न भिन्न जीवरूपेण दृश्यते। वस्तुतस्तु तद् ब्रह्म शुद्धचैतन्यमेवास्ति। घटरूपे मठरूपे वा उपाधौ विनष्टे तद्गतमाकाशं मूलाकाशरूपतां प्रतिपद्यते, तथा अन्तःकरणरूपोपाधौ नष्टे सति स जीवः शुद्धचैतन्यब्रह्मरूपतां प्राप्यते।

जीवात्मनः अनेकत्वविषये श्रयूते ब्रह्मबिन्दूपनिषदि—

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥ इति

एकोऽपि सन् परमात्मा प्रतिरूपो जायतेति कठोपनिषदि (२/२/९-१०) श्रूयते—

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।

एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥ इति

जीवब्रह्मणोः अंशित्वम्

अग्निवायुप्रभृतयः सर्वेषु भूतेषु प्रविश्य स्वकीयं रूपं प्रकाशयन्त्यपि स्वयं मूलरूपतः तथैव ब्रह्म सर्वत्र विराजमानं प्रकाशमानं सत् अपि नित्यं भवति। अतः शाङ्करवेदान्तस्य एष उद्घोषः दार्शनिके जगति सुप्रसिद्धः यत् 'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति। अस्य कथनस्य अयमेवाभिप्रायः संसारस्य कोऽपि पदार्थः तदैव सुखदो भवति यदा स आत्मनः संस्पर्शं लभते। यतो हि आलीनत्वेन अनुभूयमानस्य परकीयस्य सुन्दरस्यापि वस्तुनः सुखजनकत्वं न भवति। अतः स्पष्टमिदं मन्तव्यं यत् लोकस्य कश्चन विषयः स्वयं सुखं न प्रसूते किन्तु सुखजनयितव्यम् आत्मसम्पर्कादेव। 'आत्मा सच्चिदानन्दरूपः। तस्य सत्तायाः चेतनायाः, आनन्दस्य च आभासमात्राभेनैव जगतः विषयाः सत्तां प्रकाशमानतां आनन्दप्रदतां च आसादयन्ति। शङ्करदृष्ट्या 'जीव' तत्त्वविषये आचार्यशङ्करः अपरोक्षानुभूतै (श्लोक-५६) प्रतिपादितं यथा—

'यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम्।
तद्वद् ब्रह्मणि जीवत्वं भ्रान्त्या पश्यति न स्वतः।' इति।

अर्थात् यथा मृतिकायां घटस्य भ्रान्तिर्जायते, यथा शुक्तौ रजतभ्रान्तिर्जायते तथैव ब्रह्मणि भ्रान्त्या जीवत्वं प्रतिभासते। वस्तुतस्तु जीवतत्त्वं ब्रह्मणः अंशित्वं वर्तते। यथा एकस्य एव सूर्यस्य प्रकाशः सर्वत्र निपतति तथैव एकस्यैव ब्रह्मणः प्रकाशो भिन्नभिन्नान्तः जीवेषु निपतति। एतस्मिन् प्रसङ्गे कठोपनिषदि श्रूयते यथा (२/१०) —

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥

आत्मैव जीवात्मा। नाऽयं ब्रह्मणो भिन्नः, ब्रह्मैव अविद्यया आवृत्तम्। अविद्यकेन अन्तःकरणेन अविच्छिन्नं सद् अल्पसत्ताम् अनीश्वरतां सुखदुःखादिकं च समाश्रयद् जीवशब्देन व्यपदिश्यते। आत्मशब्दो हि चैतन्यगुणयोगेन जीवं ब्रह्म च उभयमेव अभिधत्ते। जीवब्रह्मणो समानेन नाम्ना, समानया गत्या, समानेन पक्षेण मिथः सख्यभावेन च समानं वृक्षमाश्रित्य तिष्ठतः। तयोः एकः आश्रयभूतस्य वृक्षस्य स्वादूनि फलानि भुङ्क्ते। अन्यश्च अभुञ्जानः केवलं प्रेक्षमाणस्तिष्ठतीति कठश्रुतिः प्रतिपादयति। अत्र अंशभूतो जीवः अणुः, अभ्यसः, अनिरक्तः, अल्पानन्दः, स्वल्पभाग्यः, अल्पकालीकश्च भवति। परन्तु अंशीभूतो परमात्मा महान्, सर्वज्ञः, ईश्वरः, महाभाग्यः, असीमानन्दः, नित्यः, शाश्वतः, चिरन्तनसत्यरिति आचार्यशङ्करेण ब्रह्मसूत्रभाष्ये उल्लिखितम्। जीवः जानाति यत् तस्य हृदि ईश्वरः विराजते। तस्य ईश्वरस्य विराट्रूपेण प्रकाशः मूलमेवासीत्। एतस्मिन् प्रसङ्गे शुक्लयजुर्वेदीयकाण्वसहितायां (३५/५) यत् सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराट्देहं ब्रह्मण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्मण्डाभिमानी देवतात्मा जीवोऽभवत्। एतद् श्रूयते अथर्वणोत्तरतापनीये (२/९) यथा —'स वा एष भूतानीन्द्रियाणि विराजं देवताः केशांश्च सृष्ट्वात्र प्रविष्ट विहरति'' इति। अर्थात् भूमिसृष्टेरनन्तरं तेषां जीवानां शरीराणि ससर्ज। जीवः यद्यपि स्वेच्छाबलेन कर्माणि कुरुते तथापि तेन अवश्यं ज्ञातव्यं यत् तस्य नियन्तुः इच्छानुसरेण तेन सर्वं साध्यते। नियन्तुः परब्रह्मः अधीनतां स्वीकुर्वन् जीवः परब्रह्ममयः भवति। आवरणशक्तेः स्थितिहेतोः जीवपरमयोः भेदो न ज्ञायते, तस्यां नष्टायां सत्यां भेदो कथं ज्ञायते सरस्वतीरहस्योपनिषदि यथा—

अस्य जीवत्मारोपात् साक्षिण्यप्यवभासते।
आवृत्तौ तु विनष्टायां भेदे भातेऽपयाति तत्॥

तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति।
या शक्तिस्तद्वशाद् ब्रह्म विकृतत्वेन भासते॥

अत्राप्यावृत्तिनाशेन विभाति ब्रह्मसर्गयोः।
भेदस्तयोर्विकारः स्यात् सर्गे न ब्रह्मणि क्वचित्॥ इति॥

जीवः यदा अन्येषां स्थितिं ज्ञातुं प्रभवति स्वयमपि किं तावत् कर्तव्यं किं वा न कर्तव्यं इति विषये सचेतनः भवेत्। जीवकृते निमित्तोपादनकारणरूपेण परब्रह्म विराजते। तेनैव अभिप्ररितः सन् जीवः पुनः तस्मिन् निमीलति। जीवपुरुषः सत्तापरिकल्पनां विना केवलं ईश्वरार्णबुद्ध्या सर्व कर्तुं प्रवृत्तो भवेत् चेत् तत्रैव सहावस्थानं संघटितं भवति। जीवस्य ब्रह्मव्यतिरेकेण वास्तवमस्तित्वं नास्ति। ब्रह्मैव अविद्यापाधिवशात् जीवभावं प्रपद्यते। एकस्यैव तत्त्वस्य समष्टिव्यष्टिरूपेण नामान्तरं ब्रह्मजीवात्मानौ इति। अंशभूतो जीवो हि अंशीभूतस्य भगवता सान्निध्यलाभाय सततं चेष्टते, ब्रह्मविद्या अविद्यानिवृत्तो जीवभावो निवर्तते।

वैदिकवाङ्मयानुसारं जीवस्य मुक्तेः उपायाः

वैदिकसिद्धान्तमाधारीकृत्यैव अस्माकं दर्शनशास्त्रं प्रवर्त्तते। भारतीयदर्शनपरम्परायां धर्मः, अर्थः, कामः, मोक्षश्चेति चत्वारः पुरुषार्थाः। तेषु धर्ममोक्षौ विरलानामेव पुरुषारत्नानां जीवने स्थानं लभेते। अर्थकामौ तु न तथा। इमौ तु स्वभावतः सर्वेषां समादरमुपार्ज्जयतः। परन्तु अर्थकामाविव धर्ममोक्षौ न लोकप्रियौ। तथापि जीवनस्य परमं लक्ष्यं वर्तते मोक्षप्राप्तिः। मोक्ष नाम जीवस्य स्वस्वरूपेणावस्थानम्। अयञ्च चतुर्षु पुरुषार्थेषु प्रधानतमः पुरुषार्थः। अतः मोक्षप्राप्त्यर्थं जीवपुरुषः प्रयतते। कस्तावत् मोक्षो मुक्तिर्वा इति जिज्ञासायां ब्रह्मबिन्दूपनिषदि (५) श्रूयते —

'तावदेव निरोद्धव्यं यावद् हृदि गतं क्षयम्।
एतज्ज्ञानं च मोक्षं च ततोऽन्यो ग्रन्थविस्तरः॥' इति।

श्रूयते च मोक्षस्य संज्ञा सर्वसारोपनिषदि —

'अनात्मनि देहादौ निरभिमानत्वं मोक्षः।' इति।

श्रूयते च निरालम्बोपनिषदि — 'समस्तक्षेत्रे दृश्य-समताबन्धक्षयो नाम मोक्षः' इति।

उपनिषत्सु मुक्त्युपायः —

जीवात्मा देहान्तरगमनसमये सितासितैः कर्मफलैः अभिभूयमानः सदसद्योनिम् आपद्यते। पञ्चभूतघटिते शरीरोऽयं जीवात्मा यथाकालमाविर्भवति। तत्रासौ प्राणी मोहजाले पतितः सन् एतत् सर्वं मम कृते इति मन्यमानः क्लेशातिशयं लभते। रागद्वेषादिभिः उपेतश्च सन् मुक्तिं नैव प्राप्नुयात्। अतः कर्मयोगज्ञानयोगयोरुभयोः समाचरणीयतां सूचयन्ती श्रुतिः प्रवर्त्तते। तदुक्तं शुक्लयजुर्वेदे (४०/१४) —

विद्यां चाविद्यां च यस्तद्वेदोभय सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ इति।

जीवपुरुषः अविद्यया नाम अग्निहोत्रादिकर्मणा मृत्युं तीर्त्वोत्तीर्यान्तःशुद्ध्य कृतकृत्यो भूत्वा विद्यया देवताज्ञानेनामृतं नाम देवतात्मभावं नाम मोक्षं प्राप्नोति। अत्र ज्ञनकर्मणोः समुच्चयभावः अपेक्ष्यते इति ईशोपनिषदि मुक्तेरुपायः।

ॐकारस्य उपासना मुक्तिमार्गः इति श्रूयते ध्यानबिन्दूपनिषदि (१०) —

'ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वमुमुक्षिभिः।' इति

अन्नपूर्णोपनिषदि (२/३३) श्रूयते मुक्तेरुपायः यथा—

'न मोक्षो नभसः पृष्ठे न पाताले न भूतले।
सर्वाशासंक्षये चेतः क्षयो मोक्ष इतीष्यते॥' इति

तत्रैव (५/४) जीवन्मुक्तौ भवितुम् उपायः कथ्यते—

'सङ्गत्यागं विदुर्मोक्षं सङ्गत्यागादजन्मता।
त्वं सङ्गं त्यज भावानां जीवन्मुक्तो भवानघ।' इति।

योगकुण्डल्युपनिषदि (३/२७) जीवन्मुक्तेः उपायः कथितोऽस्ति।

'ध्यायन्नास्ते मुनिश्चैवमासुप्तेरामृतेस्तु यः।
जीवन्मुक्तः स विज्ञेयः स धन्यः कृतकृतवान्॥' इति।

योगिपुरुषः कदा जीवन्मुक्तौ भवतीति विषये वराहोपनिषदि (१/४२) श्रूयते—

'यस्मिन् काले स्वमात्मानं योगी जानाति केवलम्।
तस्मात् कालात् समारभ्य जीवन्मुक्तो भवेदसौ॥' इति।

मुक्तिप्राप्तये उपायविषये तत्रैव (४/४२) श्रूयते यथा—

'द्वाविमावपि पन्थानौ ब्रह्मप्राप्तिकरौ शिवौ।
सद्योमुक्तिप्रदश्चैकः क्रममुक्तिप्रदः परः॥
अत्र को मोहः कः शोकः एकत्मनुपश्यतः॥' इति।

यथा पुत्रेष्ट्या पुत्रलाभः, वाणिज्यादिना वित्तलाभः, ज्योतिष्टोमेन च स्वर्गलाभः, तथैव पुरुषप्रयत्नसाध्येन वेदान्तश्रवणादिजनितसमाधिनैव जीवन्मुक्तिलाभो भवति। श्रूयते मुक्तिकोपनिषदि (२/१९) –

'समाधिमथ कार्याणि मा करोतु करोतु वा।
हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः॥' इति।

नचिकेताः संसारदुःखात् जीवन्पुरुषस्य निवृत्त्यर्थं यचराजं याचते स्म। कस्य पुरुषस्य पुनर्जन्म न भवतीति प्रश्ने कथ्यते यमराजेन कठोपनिषदि (१/३/८,९) —

'यस्तु विज्ञानवातन् भवति समनस्कः सदा शुचिः।
स तु तत् पदमाप्नोति यस्माद् भूयो न जायते॥

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान् नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परं पदम्॥' इति।

न्यायशास्त्रानुसारं मुक्तेः साधनम्—

न्यायशास्त्रानुसारं मोक्षः इत्युक्तेः अपवर्गः इति कथ्यते। 'तदत्यन्तविमोक्ष्योऽपवर्गः' (न्या.सू. १/१/२२) अर्थात् आत्यन्तिकीदुःखनिवृतिः अपवर्गः। अयमपवर्गः एकविंशतिप्रभेदभिन्नस्य दुःखस्य आत्यन्तिकी निवृत्तिः। अपवर्गप्राप्तिः कथं भवति ? तस्य मार्गः किम्भूतः ? इति जिज्ञासायां प्रतिपादयति तर्कभाषाकारः —'शास्त्राद्विदितसमस्तपदार्थतत्त्वस्य विषयदोषदर्शनविरक्तस्य मुमुक्षोर्ध्यायिनो ध्यानपरिपाकवशात् साक्षात्कृतात्मनः

क्लेशहीनस्य निष्कामकर्मानुष्ठानादनागतधर्माऽधर्मावनर्जयतः पूर्वोपात्तश्च धर्माधर्मप्रचयं योगर्द्धिप्रभावाद् विदित्वा, समाहृत्य भूञ्जानस्य पूर्वकर्मनिवृत्तौ वर्त्तमानशरीरापगमे पूर्वशरीराभावोऽयमेकविंशतिप्रभेदभिन्नदुःखहानिर्मोक्षः। सोऽपवर्ग इत्युच्यते।'

योगदर्शनानुसारं मुक्तेः उपायः —

'चित्तवृत्तिनिरोधः' इति योगदर्शनस्य मूलतत्त्वं वर्त्तते। मोक्षलाभाय न केवलं श्रवण-मनन-निदिध्यासनादिमार्गाः साधकैः अवलम्बनीयाः अपि तु साङ्गोपाङ्गनिरूपितेन योगमार्गस्यापि नितरां प्रयोजनमस्ति। अष्टाङ्गयोगनिर्दिष्टसमाधिः साधकानां मोक्षाय कल्पते। यतो हि ब्रह्मज्ञानप्राप्तये युगपज्ज्ञानं योगश्च द्वावेव निरूपितौ स्तः। उभाभ्यामेताभ्यां समग्ररूपेण नित्यमभ्यस्तस्य साधकस्य चेतः सम्पूर्णं समाहितं भवति, येन तस्य मुक्तिर्जायते। अतः उच्यते योगशिखोपनिषदि—

योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः।
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि॥
तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत्॥ (१/
१३,१४) इति।

अर्थात् ज्ञानयोगयोः सम्बन्धः ओतप्रोतो भवति। यतो हि—

'योगेन रहितं ज्ञानं न मोक्षाय भवेद् विधेः।
ज्ञानेनैव विना योगो न सिद्ध्यति कदाचन॥'

इति वचनात् मुक्तिप्राप्तये योगस्यावश्यकता वर्त्तते।

अद्वैतवेदान्तानुसारं मोक्षस्य मार्गः—

मुक्तिर्द्विविधा—जीवन्मुक्तिर्विदेहमुक्तिश्चेति। ब्रह्मात्मैक्योपलब्धौ मुक्तिर्भवति इत्यद्वैतवेदान्तसिद्धान्तः। अत्र जीवद्दशायां या मुक्तिः सा जीवन्मुक्तिः, देहपातानन्तरं ब्रह्मस्वरूपप्राप्तिरूपा तु विदेहमुक्तिरिति कथ्यते। वेदेषु प्रवृत्तिनिवृत्त्यात्को धर्मः मुख्यरूपेण प्रतिपादितः। तत्र प्रवृत्त्यात्मको धर्मः अभ्युदयहेतुः। निवृत्त्यात्मको धर्मः निःश्रेयसहेतुः निःश्रेयसश्च नित्यपुरुषार्थो इति अद्वैतवादिनां मतम्। स च मोक्षः ज्ञानादेव भवति। ज्ञानादेव तु कैवल्यम् इति श्रुतिवचनात् मुक्तिप्राप्तये

ज्ञानस्यावश्यकता वर्त्तते। अद्वैतवेदान्तानुसारं ज्ञानमात्मेतिरूपेण स्वीक्रियते। द्वितीयतः वृत्तिरूपं ज्ञानं स्वीक्रियते, तज्ज्ञानं प्रमारूपमप्रमारूपञ्चेति द्विविधम्। प्रमारूपमीश्वराश्रयं जीवाश्रयञ्च। जीवाश्रयं द्विविधं – पारमार्थिकं व्यावहारिकञ्च। पारमार्थिकम्, 'अहं ब्रह्मास्मि' इति चिन्तनम्। व्यावहारिकं त्रिविधम् – यथार्थानुभवरूपं, स्मृतिरूपं, प्रत्यभिज्ञारूपञ्चेति। आत्मविषयकं ज्ञानं विशिष्टात्मरूपम् अहं जीवोऽस्मि। विशुद्धात्मरूपं यथा — अहं ब्रह्मास्मि। अतः जीवपुरुषः जीवब्रह्मैक्यज्ञाने मोक्षाय कल्पते।

अतः एतत् वक्तुं शक्यते यत् उपर्युक्तविधिना निर्ममो निरहङ्कारः भूत्वा अग्निहोत्रादि सत्कर्मानुष्ठानपरायणः सन् ब्रह्मैव शरण्यं मन्यमानः 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'सर्वं खल्विदं ब्रह्म' इत्यादि महावाक्यानामर्थं सम्यगनुभूय 'नेह नानास्ति किञ्चने'त्यादि तत्त्वज्ञानाद् 'ब्रह्माहमस्मी'ति निश्चित्य निर्विकल्पसमाधिना यः तिष्ठति, स खलु मुक्तः। तस्य च पुनर्जन्म न भवतीति निश्चितमेव ॥ इति।

उपसंहारः

"वैदिकवाङ्मये जीवतत्त्वम्" इति विषये चर्च्चा पूर्वोक्ताध्यायेषु विहिता । अधुना उपसंहारः क्रियते । 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति आपस्तम्बवचनानुसारं सम्पूर्णं वेदवाङ्मयं मन्त्रब्राह्मणात्मके भागद्वये विभक्तम् । यद्यपि केचन विद्वांसः मन्त्रब्राह्मणारण्यकोपनिषदः कालभेदेन क्रमेण रचिताः विकसिता इति मन्वते परन्तु वेदविद्याविद्वांसः मीमांसकाश्च वेदं अपौरुषेयत्वम् ईश्वरप्रणीतत्वं वा मत्वा समकालिकत्वमेव स्वीकुर्वन्ति । भारतस्य दार्शनिके वाङ्मये जगज्जीवेश्वराणां विषये प्रभूताः विचाराः समुपलभ्यन्ते । ते च सर्वे वैदिकवाङ्मयाधारेणैव प्रवृत्ताः । जीवः "न जायते म्रियते वा विपश्चित्" इत्यादि श्रुतिस्मृतिवचनैः केवलं प्रकाशमानं परब्रह्मपदार्थ इति साम्प्रदायिकाः दार्शनिकाः । शङ्कराचार्यस्तु जीवो नाम परमदेवतायाः आभासमात्र इति । जीवब्रह्मणोरभेद एव तेषां मते अविद्यावशात् ब्रह्मैव जीवभावं भजते । द्वैताद्वैतवादिनः तथा च तत्सदृशाः साम्प्रदायिकाः जीवो नाम परमेश्वरस्य अंशविशेषः चित्पदार्थः नित्य इति । अन्ये दार्शनिकाः जीवो न विभुः केवलं अणुपरिमाण इति भावेन प्रतिपादयन्ति । जीवच्छरीरमेवात्मेति चार्वाकाः । जीवा अनन्तामध्यमपरिणामाः शरीरादतिरिक्ता इति जैनाः । विज्ञानसन्तान प्रतिक्षणमुत्पादिना नांशशाली क्षणिको जीव इति वैभाषिकादयः । शून्यमेवात्मेति माध्यमिकाः । ज्ञानाधिकरणमात्मा जीवेश्वरभेदभिन्नो नित्यो विभुरिति नैयायिकाः वैशेषिकाश्चेति । नित्यो विभुर्विज्ञानरूपोऽनेकश्च भोक्तात्मेति सांख्याः । शरीरादतिरिक्तः लोकपरलोककर्मफलभोक्ता चिदचिदंशरूप आत्मेति मीमांसकाः भाट्टाः । ज्ञानाश्रय आत्मेति प्रभाकराः । ईश्वरस्य चिदचिद्विशिष्टस्य परब्रह्मणः विशेषभूतचिदेवात्मेति विशिष्टाद्वैतिनः । स अणुर्नित्यः ज्ञानात्मको ज्ञानाश्रयश्चेति । देहादिभ्यो भिन्नः कर्त्ता भोक्ता अणु प्रतिदेहं भिन्नः चिद्रूपः भगवदंशभूतः परमेश्वरभिन्नो जीवात्मेति माध्वाः । भगवच्छक्तिविशेष एव जीव इति गौडीयवैष्णवाः । योगशास्त्रेऽपि जीवः परुषपदव्यपेदश्यः

स्वभावतोऽसङ्गः कूटस्थः नित्यः बुद्धिधर्मक्लेशकर्मविपाकाशयैः परामृष्ट इति प्रतिपादितः । ऋग्वेदात् आरभ्य अधुनातनसाहित्यं यावत् एवं प्रकारेण बहुधा समुपन्यस्तः अयं जीवः नित्यः अणुपरिमाण इति निश्चप्रचम् ।

परब्रह्मैव जीवः ज्ञानस्वरूपः । अथ च शरीरधारणपरित्यागनिमित्तम् अर्हः प्रतिदेहं भिन्नः असंख्याः च शुक्लयजुर्वेदीया सर्वेशाखिनः । बृहदारण्यकभागात् इदमेव ज्ञायते यथा – अग्नेः यथा क्षुद्राः विस्फुलिङ्गाः व्युच्चरन्ति एवमेवास्मात् परमेश्वरात् सर्वे प्राणाः सर्वे लोकाः व्युच्चरन्ति । व्युचरन्ति इति पदयोगात् जीवस्य जननं मरणादिकं च न सम्भवति इति सिद्धान्तितम् । व्युच्चरत्सु जीवेषु आनन्दांशस्य भावान्तरेषु च चैतन्यानन्दयोरुभयोः अंशयोः तिरोधानं भवति । घटना चेयं त्रिगुणात्मिकया भगवत इच्छारूपया मायया सम्पद्यते । अतो गुणानां प्रकर्षापकर्षतारतम्यवशात् सर्वेषामेव व्युच्चरतां भगवदंशानां चित्व, जडत्व, चिरस्थिरत्वक्षणक्षयित्वादयो धर्मतः संघटन्ते ।

''उत्क्रान्तिगत्यागतीनां तदन्तरप्रतिपत्तौ रंघति प्रश्ननिरूपणाभ्याम्'' इति शारीरिकमीमांसासूत्रद्वयात् जीवस्य नित्यत्वे फलप्रापकत्वे च श्रवणात् जीव नित्य एव विराजते । अत एव आचार्यशङ्करेण यदुक्तम् –

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।।

इति केवलाद्वैतवादीनां मतं स्वीकर्त्तुं न युज्यते, यतो हि एकस्मिन् एव जीवे अनुभूतं वस्तुं अपरस्मिन् जीवे न तावत् अनुभूतं भवति । अत एव –

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलंस्वाद्वत्यनशन्नन्यो अभिचाकशीति ।।

(ऋ.वे. १/१६४/२०)

इति ऋग्वेदश्रुति अथर्ववेदमुण्डकश्रुतिवचनात् सयुजापदसमाश्रयणात् जीवब्रह्मणोः वस्तुगत्याभेदं सूचयितुं विदुषां कल्पना अनावश्यकी । केवलं सोपाधिकभेददृष्ट्या

उभयोर्मध्ये भेदः अन्यथा जीवस्य तादात्म्यभावः सिद्धान्तितः। ''सर्वं खल्विदं ब्रह्म'' (छान्दोग्य(३/४/१),''अयमात्मा ब्रह्म'' (बृहदारण्यकोपनिषदि १/५/१९), ''सोऽहं ब्रह्माऽस्मि'' (तत्रैव १/४/१०) ''तत्त्वमसि'' (छान्दोग्योपनिषदी (६/८/१) त्यादिश्रुतिभिः जीवस्य ब्रह्मणा सह भिनगनाभिन्नत्वं पारमार्थिकत्वं नित्यत्वं च स्वीक्रियते । पुरुषभेदेन वैदिककालात् आरभ्य यद्यपि भिन्नता नोपलब्धा सहस्रशीर्षा इत्यादिमन्त्राधारेण तथापि परमपुरुषस्य विराट्पादरूपेण तस्य प्रतिपादनं समष्टिरूपेण च प्रतिपादनम् जातमस्ति। एतद् यथा व्यष्टिरूपेण परमेश्वरस्य प्रतिपादनं क्रियते तदा अयमेव जीवः पुरुषरूपेण अर्थात् भोक्तृपुरुषरूपेण उपदिष्टः भवति ।

''समाने वृक्षे पुरुषो निमग्नो अनिशयासोचतिमुह्यमानः ।

जुष्टं यदा पश्यति अन्यमीशं तदामहिमानमिति वीतशोकः ।।''

इति अथर्ववेदीय मुण्डकश्रुतिः जीवपुरुषस्य भोक्तृत्वमुपदिशति । भगवद्गीतायां पुरुषस्य इत्थं वैलक्षण्यं प्रतिपादयता पुरुषत्रयं च समुपदिशता भगवता श्रीकृष्णेन उक्तं यथा –

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।

(भगवद्गीता १५/१६)

अत्र भगवता श्रीकृष्णेन जीवतत्त्वं प्रकाशितम् ।

सर्वस्यास्य पर्यालोचनया निष्कर्षेऽयं वर्तते यद् विश्वसमष्टेः यन्मूलतत्त्वं तदेव व्यष्टिरूपेण विद्यमानायाः व्यक्तेरपि मूलतत्त्वम् । अत एवान्ततः व्यष्टिसमष्ट्योरुभयोरैक्यमेव पर्यवसीयते । तत् प्रतिपादनायैव 'सर्वं खल्विदं ब्रह्म' 'नेह नानास्ति किञ्चन' इत्यादीनाम् उपनिषद्वचनानामाशयः । सर्वासु उपनिषत्सु जीवतत्त्वसम्बन्धिया प्रोक्तेऽयं परिभाषा वरिवर्ति। जीवः न कुत्रचित् असाधारणरूपेण परमात्मरूपेण वा उपन्यस्तः अन्यथा भोक्तृपुरुषस्य भोगशङ्का स्यात् एव । जीवः स्वकर्मानुसारं फलं भुङ्क्ते तथापि ईश्वरप्रेरितः सन् सः

किमपि कर्तुं प्रभवति । तस्य इयत्ता अल्पज्ञता हेतोः सीमिता । परमेश्वरे सर्वज्ञातकारणात् इयत्तायाः अभावः । जीवः अनेनैव भावेन परमेश्वरात् भिन्नः, ज्ञातृत्वभावात् च जीवोऽयं अपि भिन्नः । श्रीनिम्बार्काचार्यपन्थिनः जीवं कर्तृ-भोक्तृरूपेण यद्यपि प्रतिपादयन्ति तथापि तत्सर्वं प्रतिपादनं ईश्वरसङ्गतमिति तत्र तत्र समुपन्यस्तम् । अत एव महाभारते जीवः ईश्वरप्रेरितः सन् शुभाशुभं करोतीति यत् यत् तथ्यं समुपदिष्टं तत् सर्वं वैदिकमेव । पूर्वजन्मकर्मवशतः जीवस्य इतस्ततः गति-महिमा-प्रतिष्ठाश्चेति सर्वं जायते तत् कृते ईश्वर एव वस्तुदानः । ईश्वरः यदि प्रेरणां न दद्यात् तर्हि जीवस्य आविर्भाव अपि न स्यात्, तीरोभाव अपि न स्यात्, विकासश्चापि न भवेत् । संसारस्य दृश्यमानतापि न स्यात् । मायायाः प्रभावः अपि न स्यात्, मोह-शोक-क्रोधप्रभृतयः परिलक्षिताश्च न स्युः । अतएव जीवः नित्यः ईश्वरभावापन्नश्च । जीवः केन भावेन नित्य इति प्रतिपादयितुम् अस्माभिः विष्णुपुराणम् अनुसर्त्तव्यम् । एतस्मिन् पुराणे स्पष्टतया भगवतः शक्तिसम्बन्धिचर्च्चा विहिता । यद्यपि श्वेताश्वतरोपनिषत्सु जीवस्य विविधा शक्तिः समुपदिष्टा तथापि तासु शक्तिषु सर्वा न तावत् समाना इति ज्ञातव्यम् । तत्र शक्तिस्त्रिविधा – अन्तरङ्ग-तटस्था-बहिरङ्गाश्चेति । एतासु तटस्था शक्तिरेव भवति जीवशक्तिः । अत एव महासागरकूले वर्त्तमानः साधारणमनुष्यः यथा सागरसम्बन्धे अनभिज्ञः, तथैव अल्पज्ञः कर्तृत्वं भोक्तृत्वादिगणयुक्तः अयं जीवः नितरां विराजते । परमेश्वरस्य तटस्थया शक्त्या अभिप्रकाशितः सन् अयं जीवः नूनं ईश्वरमभिलक्ष्य वर्तितव्यः अन्यथा तस्य कृते सकला हानिरेव ।। इति ।।

*****

सहायकग्रन्थसूची

१. ऋग्वेदः	चौखम्बासुरभारतीप्रकाशन, वाराणसी ।
२. शुक्लयजुर्वेदसंहिता माध्यन्दिनभाष्य	चौखम्बाविद्याभवन, वाराणसी ।
३. अथर्ववेदः (शौनकीयः)	विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशियारपुरम् ।
४. ऋग्वेदस्य दार्शनिकधरातलम्	नागपब्लिशर्स, जवाहरनगर, दिल्ली ।
५. ईशादिदशोपनिषदः	मोतिलालवनारसीदास, दिल्ली ।
६. मनुस्मृतिः	चौखम्बासंस्कृतसंस्थान, वाराणसी ।
७. वेदान्तकामधेनु	दशश्लोकी, तत्त्वदीपिकाव्याख्यासहिता, काठियावावा-आश्रम, सुखचर, परगणा, पश्चिमवङ्गः ।
८. श्रीमद्भागवतम्	श्रीधरीयव्याख्यासहितम्, मोतिलाल-वनारसीदास, दिल्ली ।
९. ब्रह्मसूत्रम्	वेदान्तपारिजातसौरभ-वेदान्तकौस्तुभ-भाष्यद्वयोपेतम्, पानीयघाट, वृन्दावन ।
१०. न्यायदर्शनम्	चौखम्बासुरभारतीप्रकाशन, वाराणसी ।
११. ईशानुचिन्तनम् इन्द्रियविवेकः	
१२. श्रीमद्भगवद्गीता	गीताप्रेस, गोरखपुर ।
१३. छान्दोग्योपनिषत्	कैलास आश्रम, ऋषिकेश ।
१४. कठोपनिषत्	कैलास आश्रम ऋषिकेश ।

१५. सरस्वतीरहस्योपनिषत्

१६. बृहदारण्यकोपनिषत् शाङ्करभाष्योपेता, कैलास आश्रम, ऋषिकेश ।

१७. शुक्लयजुर्वेदकाण्वसंहिता चौखम्बाविद्याभवन, वाराणसी ।
सायणभाष्य

१८. कृष्णयजुर्वेदीयतैत्तिरीयोपनिषत्

१९. कौषितकीब्राह्मणोपनिषत्

२०. वैशेषिकदर्शनम् चौखम्बासुरभारतीप्रकाशन, वाराणसी ।

२१. महाभारतम् गीताप्रेस्, गोरखपुर ।

२२. ईशावास्योपनिषत् कैलास आश्रम, ऋषिकेश ।

२३. सांख्यकारिका चौखम्बा सुरभारती प्रकाशन, वाराणसी ।

२४. तैत्तिरीयाण्यकम्, वाप्टिष्टामिशन्, कोलकता ।
सायणभाष्यम्

२५. श्वेताश्वतरोपनिषत् गीताप्रेस, गोरखपुर ।

२६. मुण्डकोपनिषत् गीताप्रेस्, गोरखपुर ।

२७. वैदिकवाङ्मयस्येतिहास: चौखम्बासुरभारतीप्रकाशन, वाराणसी ।

२८. वैदिकसाहित्य और संस्कृति आचार्य बलदेव उपाध्याय,
शारदामन्दिर, वाराणसी ।

२९. भारतीयं दर्शनम् विद्यानिधिप्रकाशन, दिल्ली ।

३०. RIG-VEDA SAMHITA - INDICES, Vaidika
Samsodhana Mandal, Poona.

****

ISBN - 13 - 078-81-925721-9-2

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info